50/29

आचार्यप्रवरश्रीमद्वल्लभाचार्यविरचितः

# विवेकधैर्याश्रयः

विवृतिचतुष्टयोपेतः

शास्त्री चिमनलाल हरिशंकर, सा.भू., शु.र.

इत्यनेन प्रथमं संपादितः, पुनश्च

शास्त्री केशवराम का. बांभणिया

इत्यनेन संपादितः सानुवादश्च ।

प्रकाशक :

रतिलाल मोहनलाल दोशी

मन्त्री

श्रीपुष्टिमार्गीय पुस्तकालय : नडियाद

...स्करणम् } मू. रू. २-०० { वि. सं. २०२०
...० ई. स. १९६४

... : जयन्ति दलाल, वसंत प्रि. प्रेस, घीकांटा रोड, अमदावाद

S
181.484 4
V 24 V

Library IIAS, Shimla
S 181.484 4 V 24 V
00009198

INDIAN INSTITUTE OF
ADVANCED STUDY
SIMLA

73

आचार्यप्रवरश्रीमद्वल्लभाचार्यविरचितः

# विवेकधैर्याश्रयः

विवृतिचतुष्टयोपेतः

Library IIAS, Shimla
S 181.484 4 V 24 V
00009198

शास्त्री चिमनलाल हरिशंकर, सा.भू., शु.र.

इत्यनेन प्रथमं संपादितः, पुनश्च

शास्त्री केशवराम का. बांभणिया

इत्यनेन संपादितः सानुवादश्च ।

Acc. No. 9198
Date 28.3.66
S 181.484A V24V

प्रकाशक :

रतिलाल मोहनलाल दोशी

मन्त्री

श्रीपुष्टिमार्गीय पुस्तकालय : नडियाद

द्वितीयं संस्करणम् प्रति ५०० } मू. रू. २-०० { वि. सं. २०२० ई. स. १९६४

मुद्रक : जयन्ति दलाल, वसंत प्रि प्रेस, घीकांटा रोड, अमदावाद

DATA ENTERED
CATALOGUED

## દ્વિતીય સંસ્કરણ

**'વિવેકધૈર્યાશ્રય'**–ચાર સં. ટીકાઓ અને વિશદ ભાષાંતર સાથે પ. ભ. શાસ્ત્રીજી ચિમનલાલ હરિશંકરજીએ પૂ. પા. ગો. શ્રી વ્રજરત્નલાલજી મહારાજ (સુરત)ના આશ્રયે સં. ૧૯૮૭ના વર્ષમાં પ્રસિદ્ધ કર્યો હતો. અત્યારે એની એક પણ નકલ મળતી નથી તેથી પૂ. શાસ્ત્રીજીની અનુજ્ઞાથી આ નવું સંસ્કરણ પ્રસિદ્ધ કરવામાં આવ્યું છે. આ સંસ્કરણમાં એવી યોજના કરી છે કે તે તે શ્લોક ઉપર ચારે ટીકાઓ એક પછી એક સાથે જ આવી જાય, જેથી તે તે શ્લોક ઉપરના જુદા જુદા મત હોય તો એ ત્યાં જ નજીકમાં જ મળી આવે અને દૂર દૂર પાનાં ઉથલાવવાં ન પડે. સ્થળસંકોચને લઈ પૂ. શાસ્ત્રીજીનો વિસ્તૃત અનુવાદ ન લેતાં ખંભાતવાળા પ. ભ. શ્રી. હીરાલાલ મોહનલાલ પરીખનો ટૂંકો અનુવાદ લીધો છે. આ પ્રકાશનના કાગળ પ. ભ. શાસ્ત્રીજી કૃષ્ણશંકર પાઠક તરફથી ભેટ આવ્યા છે અને સંપાદનની બધી જવાબદારી પ્રો. કેશવરામ કા. શાસ્ત્રીએ ઉપાડી છે, આ માટે આ ચારે મહાનુભાવોના ઉપકારનું સ્મરણ કરું છું.

આ પ્રકાશન એના અધિકારીઓને ઉપયોગમાં આવશે તો અમારી એ પાછળની સેવાનું સાર્થક્ય થશે.

તા. ૧૯–૬–'૬૪<br>
નડિયાદ

**રણછોડલાલ મગનલાલ શાહ**<br>
પ્રમુખ : પુષ્ટિમાર્ગીય પુસ્તકાલય

## પહેલા સંસ્કરણની પ્રસ્તાવનામાંથી

આ ગ્રન્થ ષોડશગ્રન્થમાં ફલ ગ્રન્થ છે. જેમ શ્રીકૃષ્ણાશ્રય છે તેમ આ પણ વિવેકધૈર્યપૂર્વક આશ્રયનું નિરૂપણ કરે છે. કોઈ વિવેક ધૈર્ય આશ્રય આ ત્રણે દંડચક્રવત્ ભક્તિમાં ઉપયોગી હોવાથી આ ત્રણે સરખા પ્રાધાન્યમાં છે એમ માને છે. કોઈ વિવેક ધૈર્યને સાધન માની આશ્રયને ફલ માને છે. કોઈ સેવાપ્રવૃત્ત જીવને આશ્રયપૂર્વક વિવેકની અને આશ્રયપૂર્વક ધૈર્યની આવશ્યકતા છે એમ આશ્રયને વિવેક ધૈર્યનો નિર્વાહક માને છે. વસ્તુતસ્તુ આ વિવેક ધૈર્ય આશ્રય ત્રણેનું નિરૂપણ કરી અંતમાં ભક્ત્યાદિ માર્ગ દુઃસાધ્ય હોવાથી જીવોને માટે મુખ્ય શરણમાર્ગ દર્શાવનાર આ ગ્રન્થ છે. વિવેક ધૈર્ય સાધન છે. આ મુખ્ય શરણમાર્ગ નિબંધમાં "जगन्नाथे विट्ठले च" આ શ્લોકમાં દર્શાવ્યો છે, તે શરણમાર્ગનું શ્રીમદાચાર્યચરણ આ ગ્રન્થ દ્વારા વિવરણ કરે છે. આ શરણમાર્ગ ત્રણે માર્ગને ઉપકારક છે, કર્મ જ્ઞાન અને ભક્તિને ઉપકારક છે. પ્રવાહપુષ્ટિ, મર્યાદાપુષ્ટિ, પુષ્ટિપુષ્ટિ, આ ત્રણેમાં મુખ્ય પ્રપત્તિમાર્ગ ઉપકારક છે, અને અનુકલ્પરૂપ પણ છે. અનુકલ્પમાં ગૌણકલ્પ અને પ્રતિનિધિ એ અર્થ સમાયા છે. મુખ્ય શરણમાર્ગ છે, પરંતુ તેને છોડી તે તે સાધનમાં રહેવું. અથવા આ કળિમાં સર્વ નષ્ટ થવાથી ત્રિકાળ–અબાધિત સ્થિર શરણમાર્ગ ગ્રહણ કરવો, એમ આ અનુકલ્પમાં ઉભય તરફ જવાય છે. આગળ એ જ મુખ્ય પ્રપત્તિમાર્ગ છે. તેનું જ આ ગ્રન્થથી નિરૂપણ છે. માટે શ્રીમહાપ્રભુજીનું જ "पृथक्शरणमार्गोपदेष्टा" નામ સાર્થક થાય છે. શરણમાર્ગનું સ્વરૂપ યદ્યપિ સુબોધિનીજીમાં છે, પરંતુ તેને શ્રીव्रजराजचरण સંકીર્ણ કહે છે અને નિબંધમાં છે તે સંક્ષેપ છે એમ કહી સ્વતંત્રતાથી શરણનું નિરૂપણ કરનાર આ ગ્રન્થ છે એમ સ્વીકારે છે.

વિવેક ધૈર્ય અને આશ્રય ત્રણે મળી સેવાને આધિદૈવિકી બનાવે છે એટલું જ કાર્ય આ ગ્રન્થમાંથી નીકળે છે એમ નથી, પરંતુ તે ઉપરાંત વિવેકાદિનાં લક્ષણ સમજી તેનાં સર્વ સ્વરૂપો જો જીવનમાં ઉતારવામાં આવે તો ગીતામાં કહેલા દૈવી જીવનને અનુરૂપ પરમ ભગવદીય થયા વિના ન રહે, એવા વ્યાવહારિક ઉપદેશની પણ અંદર ગૂંથણી કરી છે. **सर्वेषां सर्वदा हितम्** આ આશ્રયણ મહાન પ્રપત્તિમાર્ગ સર્વને સર્વકાલમાં હિતકારી છે. આશય એ જ છે કે ગમે તે પ્રાણી આ માર્ગે તરી શ્રીપુરુષોત્તમલીલારસાસ્વાદમાં અધિકારી થાય છે,

આ વિવેકધૈર્યાશ્રય માટે નીચે પ્રમાણે પ્રતિઓ ઉપલબ્ધ થઈ હતી :

**(१) श्रीरघुनाथचरणकृत विवृति—**

| | | |
|---|---|---|
| ૧ क. | ગો૦ શ્રીજીવનેશાચાર્યાત્મજ શ્રીરણછોડલાલજી, કોટાના તરફથી મળેલી મુદ્રણમાં ખાસ ઉપયોગી | શુદ્ધ છે. વાંચેલી અને પ્રાચીન છે. |
| ૨ ख. | ,, ,, ,, | પ્રાયઃ શુદ્ધ |
| ૩ ग. | ગો૦ શ્રીવ્રજરત્નલાલજી મહારાજ, સુરત તરફથી મળેલી | અપૂર્ણ અશુદ્ધ |
| ૪ घ. | ગટ્ટુલાલાજીની સંસ્થાની શ્રીયુત મૂલચન્દ્ર તેલીવાળા તરફથી | પ્રાયઃ શુદ્ધ પ્રાચીન |

**(२) गो० श्रीघनश्यामात्मज-श्रीगोपेशजी महाराजकृत विवृति**

| | | |
|---|---|---|
| ૧ क. | ગો૦ શ્રીરણછોડલાલજી મહારાજ તરફથી | શુદ્ધ વાંચેલી નૂતન |
| ૨ ख. | ,, ,, ,, ,, | ,, ,, પ્રાચીન |
| ૩ ग. | જૂનાગઢની, ગો૦ શ્રીગોકુલનાથજી મહારાજ તરફથી | નૂતન, પ્રાયઃ શુદ્ધ |
| ૪ घ. | ગો૦ શ્રીરણછોડલાલજી મહારાજ, મુંબઈ તરફથી સં. ૧૮૫૮ | પ્રાચીન પ્રાયઃ શુદ્ધ |
| ૫ ङ. | ગો૦ શ્રીવ્રજરત્નલાલજી મહારાજ, સુરત તરફથી | અપૂર્ણ |
| ૬ च. | ,, ,, ,, | વાંચેલી શુદ્ધ |
| ૭ छ. | ,, ,, ,, | અપૂર્ણ |
| ૮ ज. | શ્રીગટ્ટુલાલાજીની, શ્રીયુત મૂલચન્દ્ર તેલીવાળા તરફથી | પ્રાયઃ શુદ્ધ |
| ૯ झ. | ,, ,, ,, ,, ,, | ,, ,, |
| ૧૦ ञ. | ગો૦ શ્રીગોકુલનાથજી મહારાજ, મુંબઈ તરફથી | અશુદ્ધ |
| ૧૧ ट. | ,, ,, ,, ,, ,, | નૂતન પ્રાયઃ શુદ્ધ |
| ૧૨ ठ. | ગો૦ શ્રીવ્રજરત્નલાલજી મહારાજ, સુરત તરફથી | વાંચેલી શુદ્ધ |

**(३) श्रीगोविन्दरायात्मजश्रीगोकुलोत्सवकृत विवृति**

| | | |
|---|---|---|
| ૧ क. | ગો૦ શ્રીરણછોડલાલજી મહારાજ, મુંબઈ તરફથી | પ્રાયઃ શુદ્ધ પ્રાચીન |
| ૨ ख. | ,, ,, ,, ,, ,, | શુદ્ધતર વાંચેલી પ્રાચીન |
| ૩ ग. | ગો૦ શ્રીરણછોડલાલજી મહારાજ, મુંબઈ તરફથી | શુદ્ધતર સં. ૧૭૭૦ |
| ૪ घ. | ,, ,, ,, ,, ,, | ,, |
| ૫ ङ. | ગો૦ શ્રીવ્રજરત્નલાલજી મહારાજ, સુરત તરફથી | ,, |
| ૬ च. | ,, ,, ,, ,, ,, | શુદ્ધ-નૂતન |
| ૭ छ. | શ્રીયુત ગટ્ટુલાલાજીની રા. મૂલચન્દ્રભાઈ તરફથી | સૂચિત પ્રાયઃ શુદ્ધ પ્રાચીન સં. ૧૮૮૩ |
| ૮ ज. | ગો૦ શ્રીગોકુલનાથજી મહારાજ, મુંબઈ તરફથી | વિચ્છિન્ન વાંચેલી |

**(૪) श्रीश्यामलात्मज-श्रीव्रजराजचरणविरचित विवृति**

| | | |
|---|---|---|
| ૧ क. | ગો૦ શ્રી રણછોડલાલજી મહારાજ, મુંબઈ તરફથી શ્રીપુરુષોત્તમજીએ સ્વહસ્તાક્ષરથી લિખિત, મુદ્રણકાર્ય આ જ ઉપરથી, | શુદ્ધ અને પ્રાચીન |
| ૨ ख. | ગો૦ શ્રીરણછોડલાલજી મહારાજ, મુંબઈ તરફથી | પ્રાયઃ શુદ્ધ નૂતન |
| ૩ ग. | ,, ,, ,, ,, ,, | ,, ,, પ્રાચીન |
| ૪ घ. | ,, ,, ,, ,, ,, | પ્રાચીન વાચેલી પ્રાયઃ શુદ્ધ |
| ૫ ङ. | ગો૦ શ્રીમગનલાલજી મહારાજ, મુંબઈ તરફથી | નૂતન, શુદ્ધ |
| ૬ च. | ગો૦ શ્રીગોકુલનાથજી મહારાજ | નૂતન |
| ૭ छ. | "ગુજરાતી" પ્રેસની શ્રીયુત નટવરલાલ ઈચ્છારામ તરફથી | અશુદ્ધ |

ઉપર પ્રમાણે અનેક પ્રતોથી આ મુદ્રણકાર્ય કર્યું છે; ઉપર શ્રીગોકુલોત્સવજીની ટીકા ઉપર ચાર પાંચ પ્રતિમાં આરંભાન્તમાં પણ શ્રીગોકુલનાથજી–કૃત એમ લખે છે, પરન્તુ તે અસંભવિત છે. શ્રીગોકુલનાથજીની ટીકા જ આ ગ્રન્થ ઉપર નથી. શ્રીવ્રજરાજચરણ પોતાની પાછળના ત્રણ ટીકાકારોનો ઉલ્લેખ પોતાની ટીકામાં કરે છે : શ્રીરઘુનાથજી શ્રીગોપીશજી અને શ્રીગોકુલોત્સવજી એમ ક્રમશઃ જણાવે છે, તેથી આ ચાર જ ટીકા આ ગ્રન્થ ઉપર છે એમ નિશ્ચય થાય છે.

મોટામંદિર, સુરત<br>
સં. ૧૯૮૭

**ચિમનલાલ હરિશંકર શાસ્ત્રી**

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमदखण्डभूमण्डलाचार्यवर्यश्रीमद्वल्लभाचार्यचरणविरचितः

# विवेकधैर्याश्रयः ।

[ टीकाचतुष्टयोपेतः ]

श्रीरघुनाथचरणप्रकटिता दीपिका ।

[दी]. स्वगोकुलपरित्राणसम्भ्रमेणोद्धृताचलम् ।
क्रीडद्गोपाङ्गनापाङ्गसङ्गिगोपालमाश्रये ॥ १ ॥
मन्मानसेऽस्तु सततं श्रीविट्ठलपदाम्बुजम् ।
संसारभयभीतानां यत्स्मृतिर्भयनाशिनी ॥ २ ॥

अथ भगवन्मार्गप्रवृत्तानामेकान्तिकभक्तानां भक्तिं सिषाधयिषूणां तत्साधनोपायान् विवेकधैर्याश्रयान् स्वस्वासाधारणलक्षणलक्षितान् विवेक्तुमादौ तानसाधारणस्वशब्देन निर्दिशन्ति विवेकेति ।

श्रीगोपीशविरचिता विवृतिः ।

[गो.] श्रीमदाचार्यचरणनखचन्द्ररुचे नमः ।
हृदि प्रविश्य यद्ध्वान्तं निर्धूतं मे यथा स्वतः ॥ १ ॥
यत्कृपातो विवेकादिधर्माः स्वीये भवन्ति हि ।
तत्पादतलसम्बन्धिरेणुः शरणमस्ति मे ॥ २ ॥

अथ भक्तिमार्गाङ्गीकारेण भगवतो दासत्वं प्राप्तस्य सेवायां प्रवृत्तस्य सेवानिर्वाहेण भक्तिदार्ढ्यार्थं नवरत्नोक्तचिन्तात्यागकथने विवेकधैर्याश्रया यद्यपि सङ्क्षेपत उक्तास्तथापि विवेकादीनां विशेषविज्ञानाभावे सेवायां तादृशी दृढता न भविष्यतीति स्वीयानां विशेषेण तद्दार्ढ्यार्थं श्रीमदाचार्यचरणा विवेकधैर्याश्रयान् विस्तरतो निरूपयन्ति विवेकेति ।

श्रीगोविन्दरायात्मजश्रीगोकुलोत्सवविरचिता विवृतिः ।

[गो. उ.] यत्पादाब्जाश्रयादासन् सर्वे पूर्णमनोरथाः ।
तमेव गोकुलाधीशं सर्वसिद्ध्यै समाश्रये ॥ १ ॥

अथ सकलकर्मादिमार्गाधिकारेषु सत्सु भक्तिमार्गानुसारेण भगवदाश्रय एव सर्वपुरुषार्थसाधकस्तदाश्रये च विवेकधैर्ये हेतू । तथाहि, विवेके सति सर्वोत्तमत्वं भगवति ज्ञात्वा तदा-

श्रयं करोति जीवः। धैर्ये च सति दाढर्ये भवति, तेन विवेकधैर्याभ्यामविरतं भगवदाश्रयो भवति तत्र स्वीयानां भक्तिसिद्ध्यर्थं विवेकधैर्याश्रयान् निरूपयन्ति विवेकधैर्ये इति।

श्रीश्यामलसुतश्रीव्रजरायचरणविरचिता विवृतिः।

[व्र.] यत्प्राप्तिमात्रतो नूनं रतिः स्याद्गोकुलाधिपे।
स श्रीमदाचार्यपादरेणुर्मह्यं प्रसीदतु ॥ १ ॥

अथ श्रीमदाचार्यचरणा निबन्धे वैदिकयोः कर्मज्ञानमार्गयोर्भक्तिमार्गस्य च सम्यक्प्रपञ्चितत्वेपि कलौ तेषां दुःसाध्यत्वं विमृश्य तत्रासमर्थानामर्थे सङ्क्षेपेण 'जगन्नाथे विठ्ठले चे'त्यत्रोक्तं प्रपत्तिमार्गं हृदि सिद्धवत्कृत्वेदानीं तं प्रपञ्चयिष्यन्तस्तस्य मार्गस्य पूर्वोक्तमार्गत्रयोपकारत्वं च बोधयिष्यन्तो विवेकधैर्याभ्यामाश्रयस्य सिद्धिं बोधयितुं तत्साधने विवेकधैर्ये रक्षितुं नियुञ्जन्ति, तद्रक्षणस्यावश्यकत्वं वा बोधयन्ति विवेकेत्यादि।

**विवेकधैर्ये सततं रक्षणीये तथाश्रयः।**
**विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यति ॥ १ ॥**

[दी.] **रक्षणीये** स्वीकार्ये। तत्र विवेकादयः कीदृशा इति स्वरूपजिज्ञासायां प्रथमोद्दिष्टस्य विवेकस्य फलितस्वरूपमाहुर्विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यतीति। तुशब्दः प्रसिद्धिद्योतनार्थः। अन्यथाऽप्रामाणिकत्वं स्यात्। हरति त्रिविधमपि भक्तदुःखमितिव्युत्पत्त्या सकलदुःखहारिसमभिव्याहारिहरिपदेन 'भगवान् करिष्यति न वे'त्यविश्वासो निरस्तो वेदितव्यः। हरिपदनिर्वचनं तु महाभारते स्फुटम्। तद्यथा, 'हराम्यघं हि स्मर्तॄणां हविर्भागं क्रतुष्वहम्। वर्णश्च मे हरिश्चेष्ठस्तस्माद्धरिरहं स्मृत' इति। सर्वमैहिकं पारलौकिकं निजेच्छातो जीवादृष्टप्रयत्नादिनिरपेक्षालौकिकस्वेच्छात इत्यर्थः। एवं वाक्यार्थानुसन्धानेन स्थेयमिति तात्पर्यम् ॥ १ ॥

[गो.] सेवायां प्रवृत्तस्य प्रथमं विवेकः सर्वथापेक्षितः। ततो धैर्यम्। एतद्द्वयसिद्ध्यर्थमाश्रयश्चेति क्रमः। एवं सति सर्वात्मनाश्रय एव कृते सर्वं सेत्स्यतीत्यन्ते तन्निरूपणम्। तत्र प्रथमं विवेकलक्षणं निरूपयन्ति विवेकस्त्विति। हरिः सर्वदुःखहर्त्ता। सर्वं लौकिकं स्वप्रयत्नसाध्यं योगक्षेमादि, अलौकिकं भगवत्सेवोपयिकं च स एव करिष्यति, न तु सेवां विहाय स्वप्रयत्नादिकं कर्त्तव्यमिति प्रथमो विवेकः। यतः सर्वेषामपि दुःखहर्त्ता स एव। मम त्वङ्गीकृतस्यापेक्षितं करिष्यत्येवेति विश्वासेन सेवैव कार्या, न तु प्रयत्नादिकम्। तत्करणे बाहिर्मुख्यं सेवाप्रतिबन्धादिकं भवतीति एतदेव "चिन्ता कापी"ति श्लोके निरूपितं नवरत्ने ॥ ननु प्रार्थनाभावे कथं करिष्यति तत्राहुर्निजेच्छात इति। स अलौकिकः प्रभुः

स्वकीयानामपेक्षितं जानाति, सेवामपि जानातीति स्वेच्छयैव करिष्यति, न प्रार्थनामपेक्षत इति प्रार्थना न कार्येति द्वितीयो विवेकः। एतदेव 'सर्वेश्वरश्च सर्वात्मे'त्यत्रोक्तं नवरत्ने ॥ १ ॥

[गो. उ.] **विवेकधैर्ये निरन्तरं रक्षणीये** । **आश्रयो** भगवदाश्रयः सोपि तथा निरन्तरं रक्षणीय इत्यर्थः। एतेषां रक्षणं चैतदनुसन्धानपूर्वकमेव तदनुकूलकृतिकरणम्। मुख्यो भगवदाश्रयः, तदङ्गे च विवेकधैर्ये इति ज्ञापनाय विवेकधैर्ययोरेकपदेन निरूपणम्, आश्रयनिरूपणं चान्येन। तत्र विवेकस्य प्रथमोद्दिष्टत्वात्प्रथमं विवेकं लक्षयन्ति **विवेकस्त्विति**। विवेकस्त्वयमेव, न त्वन्य इत्यन्ययोगव्यवच्छेदार्थस्तुशब्दः। विवेकस्वरूपमाहुर्हरिरिति। हरिः सर्वदुःखहर्ता, तेन यत्करिष्यति तद्भव्यमेव करिष्यतीति भावः। तदपि कियत्कार्यं कृत्वा निवर्त्तिष्यत इति नास्तीत्याहुः **सर्वमिति**। **निजेच्छातः** स्वेच्छातः। तथा च न प्रार्थनीय इत्यर्थः। अत एव प्रह्लादवचनं 'नान्यथा तेऽखिलगुरोर्घटते करुणात्मनः'। 'यस्तु आशिष आशास्ते न स भृत्यः स वै वणिक्,' अत एव 'नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीयाः, येन्योन्यतो भागवतप्रधानाः सभाजयन्ते मम पौरुषाणी'त्यादिवाक्यानि॥१॥

[व्र.] **सततं निरतरं रक्षणीये** इति प्रैषे प्राप्तकाले वा अनीयस्तेन नियोग आवश्यकत्वं च समञ्जसम्। रक्षणे नैरन्तर्योक्त्या आश्रयोत्तरमपि तद्रक्षणावश्यकत्वं बोध्यते। रक्षणं चात्र तन्नाशकनिवारणेन तत्पोषणम्। एतदेव साम्प्रदायिकैः स्वीकारत्वेन तदनुसन्धानपूर्वकतदनुकूलाकृतिकरणत्वेन च बोधितम्। तेन च फलमाहुस्तथाश्रय इति। तथाकृते आश्रयः सिद्ध्येदित्यर्थः। यद्वा, ते तथा तेन प्रकारेण **रक्षणीये** यथा आश्रय सिद्ध्येदित्यर्थः। यत्तदोर्नित्यसम्बन्धात् क्रियामात्रस्यैवाध्याहारः। आश्रये क्रियासम्बन्धस्य कण्ठतोनुक्त्या पृथगुपादानेन च स्वकृत्यसाध्यत्वं तुष्टप्रभुदानसाध्यत्वं च ज्ञाप्यते, "सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रहमीशमन्य" इत्यक्रूरस्तुतौ **सुबोधिन्यां** तथा प्रपञ्चनात्। अत्र **साम्प्रदायिकाः**। अध्याहारापेक्षयाऽनुषङ्गस्य वचनविपरिणामस्य च लघुत्वात्तथा आश्रयो रक्षणीय इत्येवं योजनं ज्यायो मत्वा केचन त्रयाणां दण्डचक्रादिन्यायेन भक्त्युपायत्वसामान्यात् समप्राधान्यं रोचयन्ते। केचन पूर्वयोरेकपदेन कथनात् तृतीयस्य पृथगेवोपादानात्पूर्वयोरुत्तरहेतुत्वं युक्तमुत्पश्यन्ति। केचन त्रयाणां क्रमेणोक्तेः सेवायां प्रवृत्तस्य पूर्वं विवेक आवश्यकस्ततो धैर्यम्, आश्रयस्तूभयनिर्वाहक इति तात्पर्यं प्रकाशयन्ति। यद्यप्येवं मतत्रयमप्युपपन्नं, तथापि समाप्तावाश्रयस्य फलसम्बन्धबोधनात् स्वस्वाभिसंहितरूपेणाश्रयस्यैव मुख्यत्वप्रकाशनाच्चाध्याहारेण योजनाप्यदुष्टैव। न च गौरवं शङ्कनीयम्, तत्पक्षेप्यनुषङ्गविपरिणामयोर्द्वयोरङ्गीकारेण तौल्यात्। किञ्चैवं "पृथक् शरणमार्गोपदेष्टे"ति

नामापि पुष्टार्थं भवति। अन्यथा तु निबन्धे सङ्क्षेपेण निरूपणात्सुबोधिन्यामप्यन्यशेषत्वेन क्वचित् सङ्कीर्णत्वात्तत्र तत्र किञ्चित् कथनेन विप्रकीर्णत्वाच्च 'पृथक्'पदमपुष्टार्थं स्यात्। न चैवं सति भक्त्यङ्गत्वभङ्गात् सुबोधिन्यादौ तथात्वेन निरूपणं विरुद्ध्येतेति वाच्यम्, उपकारकत्वेन गौण्यापि तत्सम्भवात्। किञ्चायं शरणमार्गो न भक्तिमार्गाद्विविक्तः, पुष्टिप्रवाहमर्यादाग्रन्थे पृथक् तदनुक्तेः, किन्तु प्रवाहादत्यन्तं विविक्तो भगवति स्वस्वामित्वस्य सर्वदानुसन्धानान्मर्यादाया अपि विविक्तः, पुष्ट्या सङ्कीर्णः। तेन प्रयोजनैक्यात्तत्र मिश्रभेदेष्वेतन्मिश्रत्वानुक्तेरत्र च समाप्तावाश्रयकथने "कलौ भक्त्यादिमार्गा हि दुःसाध्या इति" मार्गत्रयदुःसाध्यत्वस्य हेतुत्वकथनेनास्य भक्त्यादिमार्गानुकल्पत्वबोधनाच्च स्वरूपभेदात् त्रितयसजातीयः स्वफलसाधनेन तत्तदुपकारकश्चेति सिद्ध्यति। तच्चानुकल्पत्वं "नामान्यनन्तस्ये"त्यत्र प्रथमस्कन्ध-षष्ठे प्रपञ्चितम्। यद्यपि तद्विरक्ताधिकारित्वं, तथापि गीतायां द्वादशेऽध्याये "अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रित" इत्यत्र "सर्वधर्मानि"त्यत्र च गृहस्थमर्जुनं प्रति कथनाद् गृहस्थाधिकारिकत्वमपि सिद्ध्यति। अनुकूलस्योपकारकत्वं च पूर्वतन्त्रसिद्धम्। एतावान्परं विशेषस्तत्र फलोपकारकत्वं सिद्धमत्र तु स्वरूपोपकारकत्वमप्यस्तीति। तेन येषां यथा भातस्तैस्तथा विवृत इति न कोपि क्वापि विरोधः॥ ननु निबन्धोक्तस्यैवात्र विस्तार इति कथं विनिगन्तव्यमिति चेत्, इत्थम्। तत्र पूजाप्रवाहस्य भगवत्साम्निध्यगमकत्वमुक्त्वा तत्र तत्परत्वेन स्थितिः प्रपत्तिरिति मार्गस्वरूपं निष्कृष्टम्, परन्तु तच्छरीरप्रविष्टं तत्परत्वं न विचारितम्। तदत्र सिध्यतीति तथा विनिगम्यते। किञ्च, प्रपत्तिपदार्थः शरणगमनम्। "कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभञ्जन। वयं त्वां शरणं याम"इति मागधसंरुद्धराजवाक्यसुबोधिन्यां प्रपन्नभयनिवारकत्वं तत्रावश्यकं, "अतो वयं प्रपन्ना भवाम" इत्याहु"र्वयं त्वां शरणं याम" इति शरणगमनस्य प्रपन्नभवनत्वेन व्याख्यानात्। तच्चात्र स्फुटमतोपि तथेति दिक्॥ प्रकृतमनुसरामः। एवमुभयोर्विवेकधैर्ययो रक्षणं तस्य फलसम्बन्धश्च बोधयित्वा तयो रक्षणप्रकारमाश्रयस्य च मार्गं वक्तुं तेन तत्स्वरूपं च वक्तुमुद्देशानुसारेण प्रथमं विवेकस्य स्वरूपमाहुः विवेकस्त्वित्यादि। साम्प्रदायिकास्तु, 'विवेकोयं समाख्यातः' 'एतत्सहनमत्रोक्तम्' 'एवमाश्रयणं प्रोक्त'मित्युपसंहारदर्शनात् सामान्यविशेषभावेन विवेकधैर्याश्रयाणां स्वरूपस्यैव निरूपणामत्र ग्रन्थनाम्ना समासव्यासधारणस्य विद्वद्दिष्टत्वेन च तथा कथनस्यौचित्याच्चेत्याशयेन व्याकुर्वन्ति। तथा सति रक्षणप्रकारस्यार्थात् सिद्धिः। एवं तु वचनादिति शेषः॥ प्रकृतमनुसरामः। विवेकशब्दः पृथक्त्वे तज्ज्ञाने वा प्रसिद्धः, यथा नित्यानित्यवस्तुविवेक इति। शीलविशेषे च यथा उचितसत्कारकर्त्तरि विवेकीति। "विवेकः पुनरेकान्ते जलद्रोणीविचारयो" रिति कोशात् त्रिषु रूढश्च। तदत्र किमपि न विवक्षितमिति ज्ञापनाय तुशब्दः। कस्तर्हि?। हरिः सर्वं निजेच्छातः करिष्यति। हरिः सर्वदुःखहर्त्ता सर्वं स्वीयानां

लौकिकालौकिकं, **निजेच्छातः** स्वतन्त्रेच्छातः, क्रीडेच्छातो वा, निजानामिच्छातो वा, **करिष्यति**। अयं च विषयनिर्देशस्तेनैतद्विषयकमनुसन्धानं **विवेक** इत्यर्थः। अत्र **हरि**पदेन गजेन्द्रमोक्षकर्तृत्वस्फोरणात्पशुवदज्ञानामत्यन्तदुःखहारित्वं सूच्यते। **निजेच्छात** इत्यनेन "क्रीडाभाण्डमिदं विश्वं" "क्रीडार्थमात्मन इदं त्रिजगत्कृत"मित्यादिवाक्योक्तं जगतः क्रीडाभाण्डत्वं स्मार्यते। इच्छाविशेषणीभूतनिजपदेन स्वस्य विशेषतस्तदीयत्वं च। अतः स्वस्याज्ञत्वे क्रीडाभाण्डत्वे वा स्फुरिते, "विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्ययोगमायः। क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थ" इत्यादिरूपेणानुसन्धेयम्। विशेषतस्तदीयत्वस्फूर्त्तौ "अहं भक्तपराधीनः" "मयि ते तेषु चाप्यहं" "आत्मारामोप्यरीरम"दित्यादिवाक्योक्तं भगवतो भक्ताधीनत्वं परोक्षेण हितकारित्वं स्वनिकटवर्तित्वं स्वरूपमर्यादामप्यतिक्रम्य भक्ताभिलापपूरकत्वं यथाधिकारमनुसृत्य भाविहितकारित्वमनुसन्धेयमिति तस्य तस्य तादृक्तादृगनुसन्धानं **विवेक** इति भावः। **करिष्यतीति** भविष्यदर्थकप्रयोगो भाव्यर्थचिन्ताया जायमानत्वात्तन्निवृत्त्यर्थो, न तु भूतवर्त्तमानयोर्भगवत्कार्यत्वानुसन्धानव्यावृत्त्यर्थः। तेन करोत्यकार्षीत् करिष्यतीति त्रेधाप्यनुसन्धानं **विवेक** इति फलति ॥ १ ॥

[दी.] 'ननु लोके भगवद्भक्तानामपि मौढदुःखदूरीकरणार्थं भगवान् प्रार्थनीय एव। तस्मादशक्यार्थोपदेश एवायं पङ्गोर्गिरिलङ्घनवद्विवेकोपदेश इत्यत आहुः **प्रार्थिते वेति**।

[गो.] ननु प्रार्थना कुतो न कार्या तत्राहुः **प्रार्थिते वेति**।

[गो. उ.] ननु सेवकैः प्रभुः प्रार्थनीय एवेति चेत्तत्राहुः **प्रार्थिते वेति**।

[व्र.] एवं स्वरूपं विवेकस्य निरूप्य रक्षणप्रकारं वदिष्यन्तस्तत्प्रसङ्गेन कामनायास्तत्पूरणसाधनस्य च तन्नाशकत्वं हृदिकृत्य गजेन्द्रवत् व्रजस्थवत् प्राप्तस्यापि प्रार्थनस्य बाधकत्वं च हृदिकृत्य ततो रक्षितुं प्रार्थनस्य फलव्यभिचारित्वं युक्त्या समर्थयन्ति **प्रार्थिते वेति**।

**प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयात्।**
**सर्वत्र तस्य सर्वं हि सर्वसामर्थ्यमेव च ॥ २ ॥**

[दी.] वेति विकल्पे विवेकास्फूर्त्तिदशायाम्। **ततः** प्रार्थनातः **किं स्यान्न** किमपीत्यर्थः। कुत इत्यपेक्षायां, **स्वाम्यभिप्रायसंशयादि**ति। स्वामी प्रभुः, तस्याभिप्रायस्य चिकीर्षितस्य ज्ञातुमशक्यत्वात् संशयो भवत्येव। यत्र 'फलानुमेयाः प्रारम्भा संस्काराः प्राक्तना इवे'त्यादिषु लौकिकप्रभ्वभिप्रायोपि पूर्वं ज्ञातुमशक्यस्तत्र किं वाच्यमलौकिकप्रभोरभिप्रायस्येति ॥ ननु भक्तेच्छापूरणाय भगवानशक्यमप्यर्थं सम्पादयति, तच्च बह्वायाससाध्यमस्म-

दादिवद्भगवतोपि कदाचित् स्यादिति तदर्थं पुनः पुनः प्रार्थनया भगवान् स्मार्यते। ( भगवतस्तत् कार्यं स्मार्यत ) इत्यत आहुः **सर्वत्रेति**। सर्वस्मिन् काले देशे च यत्किञ्चिद्वस्तुमात्रं **तत्सर्वं तस्य** भगवत एवेत्यर्थः। हिशब्दः प्रसिद्धौ। सा च 'अहं सर्वस्य जगतः प्रभव' इत्यादिषु ज्ञेया॥ ननु भक्तार्थं भगवतोप्यकालवस्तुसम्पादनमायाससाध्यं भविष्यतीति चेत्तत्राहुः **सर्वसामर्थ्यमेव चेति**। न हि भगवतोपि कालमपेक्ष्यैव कार्यकरणं सम्भवति, प्रत्युत कालस्यैव भगवदधीनत्वाज्जन्यत्वाच्च तत्सापेक्षत्वम्। चकारात् कर्त्तुमकर्त्तुमन्यथाकर्त्तुं सामर्थ्यमपि द्योत्यते॥ २॥

[गो.] कृतेपि प्रार्थने किं स्यान्न किमपीत्यर्थः। तत्र हेतुः **स्वाम्यभिप्रायसंशयात्**। भगवान् स्वेच्छयैव दास्यति, नान्यथेति, किमर्थं स्वधर्महानिः कर्त्तव्येति **तृतीयो विवेकः**। किञ्च, स्वस्य प्रयत्नकरणेपि भगवांश्चेन्न दास्यति तदा प्रतिबन्धादिना तन्न सेत्स्यति। अथवा **सर्वत्र** स्वापेक्षितवस्तुनोऽभावात्तत्प्राप्तिर्न स्वशक्त्या। अथवा, तद्वर्ततेपि तथापि तत्प्राप्तिसाधने सामर्थ्यं नास्ति। भगवतस्तु सर्वत्र तत्तद्वस्तु सिद्धमेवास्ति, अभावे वा तदैव तत्सम्पादने **सामर्थ्यमपि** वर्तत इति। असाध्यमपि भगवान् साधयतीति तत्सेवां विहाय स्वप्रयत्नादिकं वृथेति **चतुर्थो विवेकः**।

तमेव निरूपयन्ति **सर्वत्रेति**। **तस्य** भगवतः **सर्वत्रैव सर्वं** वस्तु सिद्धमेवास्ति, अभावेपि सर्वं सम्पादयितुं **सामर्थ्यं** वर्तत इति। **सर्वत्र** यत्र यत्र यद्यद्वस्तु वर्तते तत्सर्वं भगवत एव, स्वाज्ञानेन लोकाः स्वत्वं मन्यन्त इति। यस्य यदपेक्षितं तदपि साक्षात्परम्पराभेदेन भगवानेव ददाति। स्वाज्ञानेन मया प्रयत्नेन कृतमिति मन्यन्त इति मम पूर्वसिद्धमपि भगवतैव दत्तं, साम्प्रतं तदङ्गीकृतस्य तु दास्यत्येवेति निश्चयेन सेवैव कर्त्तव्या, न प्रार्थनेति भावः सूचितः॥ २॥

[गो. उ.] **प्रार्थितेपि ततः** प्रार्थनात् **किं स्यान्न** किमपीत्यर्थः। तत्र हेतुः **स्वाम्यभिप्रायेति**। यतः प्रभोरभिप्रायः पूर्वं ज्ञातुमशक्यः, प्रभुश्च स्वाभिप्रेतमेव करिष्यति। लौकिका अपीश्वराः स्वतन्त्रा भवन्ति, किं पुनः सकललोकमहेश्वरः॥ ननु निजेच्छातस्तदा करिष्यति यदि सामग्री सङ्घटिता स्यात्, न ह्यसम्भृतसामग्रीकः किमपि कर्तुं शक्नोतीति चेत्तत्राहुः **सर्वत्रेति**। **तस्य** भगवतः **सर्वत्र** सर्वस्मिन्नेवायोग्येपि देशे सर्वयोनिषु च **सर्वं** वस्तु सिद्धमेवास्ति, अप्रतिहतेच्छत्वात्। अत एव "किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने" इत्यादि॥ ननु सम्भृतसामग्रीकोपि यदि स्वयमसमर्थः स्यात् तदा कथं कुर्यात्तत्राहुः **सर्वेति**, "यः सर्वशक्ति"रिति श्रुतेः। सर्वप्रकारकं सामर्थ्यं विद्यत इति साधनन्यूनत्वे साधनमपि सम्पाद्य फलं दातुं समर्थः। साधनं विनापि फलं दातुं समर्थ इत्यर्थः। अत एव व्रजवासिभ्यो निःसा-

धनेभ्य एव फलं दत्तवान्, 'ते नाधीतश्रुतिगणा नोपासितमहत्तमाः। येन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'त्यादिवाक्यात्। अत एव निर्द्धारक एवकारः। चकारादिच्छापि। न हीच्छां विना कोपि किमपि करोति ॥ २ ॥

[व.] वेत्यनादरे, अभ्युपगम्य दूष्यते। प्रार्थिते प्रार्थनकृते ततः प्रार्थनातः किं स्यात्? न किमपीत्यर्थः। न हि गजेन्द्रस्य प्रार्थनातो मोक्षदानं, किन्तु स्वेच्छातः। यदि ततः स्यात् प्राग्जन्मन्येव स्यात्, "जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षित"मिति वाक्यात्तदानीमपि प्रार्थनस्य तुल्यत्वात्। किन्तु, विचारितस्य मर्यादास्थापनस्य भक्त्या तोषस्य स्वसर्वात्मत्वज्ञापनादेश्च कार्यस्य जातत्वेन स्वेच्छात एव, अन्यथा "नय मा"मित्यत्र नान्तर्दध्यात्। अथापेक्षितदानमापाततः प्रार्थनयैव चेदाद्रियते तदापि कालविलम्बेन फलव्यभिचारेण चान्यथासिद्धत्वम्। अथ सापि चेत् कथञ्चित् परिह्रियेत तर्हि सा भगवदभिप्रायनिश्चयकृता प्रार्थना, न तु स्वाम्यभिप्रायसंशयकालीना। तथा सति तत्रापीच्छैव कारणत्वेन पर्यवस्यतीति तत्र प्रार्थनाया व्यापारतामात्रं सेत्स्यति। संशयकालीनायास्तु तदपि न। प्रत्युताधीरत्वज्ञापकतया क्रोधोपेक्षावहतया वा बाधकत्वं च। एतेनैव भ्रमकालीनापि व्याख्यातैव। किञ्च, यथा तथास्तु, स्वस्य जीवत्वेनाल्पज्ञत्वात् स्वमनोरथस्याप्यल्पत्वात्प्रार्थितस्तावदेव दास्यति कुब्जाया इव। कुमनीषितं चाधिकं भविष्यति। अप्रार्थितस्तु प्रभुरलौकिकत्वात्ततोनन्तगुणं दास्यति। तदुक्तं "मनोरथान्तं श्रुतयो यथा ययु"रिति। तदेतदुक्तं प्रार्थिते वा ततः किं स्यात्स्वाम्यभिप्रायसंशयादिति। तथा च प्रार्थनेन दाने विवेकस्य सामर्थ्यनाशः, अदाने खेदात् स्वरूपनाशस्ततोस्माद्बाधकादेवं विचारेण स रक्षणीय इति भावः। एतेन कामनायाः पूरकं साधनान्तरं कैमुतिकादेव निरस्तम्। प्रार्थनैव चेन्निष्फला काम्यकर्माणि किमुतेति। "सुखाय कर्माणि करोति लोको न तैः सुखं चान्यदुपारमं वा, विन्देत भूयस्तत एव दुःखं यदत्र युक्तं भगवान्वदेन्न" इति तृतीयस्कन्धे काम्यकर्मणां फलव्यभिचारस्यानिष्टहेतुत्वस्य च विदुरेणैव दर्शितत्वात्। न च साङ्गाद्वैदिककर्मणः फलावश्यंभावनियमात्फलव्यभिचारो न प्राप्तावसर इति शङ्क्यम्, दक्षयज्ञादिवत् साङ्गताया एव दुर्घटत्वात्। इदं यथातथा "कर्मणां गहनागति"रित्यत्र निबन्धे प्रपञ्चितमिति ततोऽवधेयम्॥ नन्वस्त्वेवम्, तथापि निन्दावाक्यात्कुब्जादावप्यभिप्रायाज्ञानादेव प्रार्थनस्य तथात्वं, ज्ञाने तु न तथा दोष इति स्वाभिलाषपूर्त्यर्थं प्रभुर्विज्ञापनीय एवेति चेन्नेत्याहुः सर्वत्रेत्यादि। सर्वत्र ब्रह्माण्डे अन्तर्बहिश्च तस्य स्वामिनः सर्वं वस्तुमात्रमस्तीति शेषः। हीति युक्तं क्रीडार्थत्वात्, सर्वसामर्थ्यं च तस्यैव, "यः सर्वज्ञः सर्वशक्तिः" "सर्वस्य वशी सर्वस्येशान" इत्यादि श्रुतेः। तथा च यदि दित्सेत् सर्वज्ञत्वादस्मदभिलाषं ज्ञात्वा तदैव दद्यात्। यदि जीवे तत्फलानुभवासामर्थ्यं

पश्येत्तदपि विदध्यात् तन्मनोभिलषितप्रकारेणैव स्वस्मिन्नपि तथात्वं प्रकटीकृत्य वा तन्मनोरथं पूरयेत्। एतदपि "एवं सन्दर्शिता ह्यङ्ग हरिणा भक्तवश्यता। गोपीभिः स्तोभितोऽनृत्यत्" "दर्शयंस्तद्विदां लोक आत्मनो भृत्यवश्यता'मित्यादिभिरुक्तम्। एवं सत्यपि यन्न ददाति तस्मान्न दित्सतीति निश्चितम्। निश्चिते चाभिप्राये प्रार्थना न प्राप्तावसरेति न प्रार्थनीय इत्यर्थः। एतदेवाभिसन्धाय श्रीमत्प्रभुचरणैरुक्तं "यथा वयं तदीयाः स्मस्तथा सोपि निसर्गतः अस्मत्प्रभुरतश्चिन्ता नैहिके पारलौकिक" इति। एवं कामितपूरकाद्रक्षणप्रकार उक्तः ॥ २ ॥

[दी.] कदाचिदत्यन्तापेक्षितमपि कार्यं भगवान्न करोति, तेन भक्तमनस्यभिमानो भवेन्मया भजनार्थमपि प्रयत्नो न कर्त्तव्य इति, तन्न कार्यमित्याहुर**भिमानश्च सन्त्याज्य** इति।

[गो.] ननु किञ्चित्कालं सेवां कुर्यादितरकाले चेदन्यत्कार्यं करोति तदा को दोषस्तत्राहुर**भिमानश्चे**ति।

[गो. उ.] भगवद्धर्मान् विविच्य जीवधर्मान् विवेचयन्त्य**भिमानश्चे**ति।

[व्र.] अतः परं कामनातो रक्षणप्रकारो वक्तव्यस्तं वक्तुमाहुर**भिमान** इत्यादि।

> **अभिमानश्च सन्त्याज्यः स्वाम्यधीनत्वभावनात्।**
> **विशेषतश्चेदाज्ञा स्यादन्तःकरणगोचरः ॥ ३ ॥**
> **तदा विशेषगत्यादि भाव्यं भिन्नं तु दैहिकात्।**
> **आपद्गत्यादिकार्येषु हठस्त्याज्यश्च सर्वथा ॥ ४ ॥**
> **अनाग्रहश्च सर्वत्र धर्माधर्माग्रदर्शनम् ॥**

[दी.] चकारात् कार्यानिष्पत्तिनिमित्तग्लानिरपि। समित्यनेन बाह्याभ्यन्तरभेदराहित्येन त्यागः सूचितः। ततो हेतुः स्वाम्यधीनत्वभावनादिति। सर्वस्वनिवेदनेनान्तःकरणमपि निवेदितमेव। अभिमानश्चान्तःकरणधर्मः। स च सुतरां न कार्य इति भावः। एवं स्वतः कार्यमात्रं न कर्त्तव्यमिति प्राप्ते भगवदाज्ञायां विशेषमाहुर्विशेषतश्चेदाज्ञा स्यादिति। देहसम्बन्धि देहनिर्वाहकं कार्यं दैहिकमित्युच्यते। तच्च सर्वदाप्यनिषिद्धमेव।

विशेषतो विशेषनिमित्ताद् विशेषकार्यकरणार्थमिति यावत्। सापि न बाह्यतः, किन्त्वान्तःकरणगोचरोन्तःकरणपूर्विका यदि स्यात्, तदैव दैहिकाद्भिन्नं विशेषगत्यादि भाव्यं कार्यमित्यर्थः। गतिपदेन क्रियामात्रं लक्ष्यते। आदिपदेन प्रार्थनमपि कार्यमध्ये कचित्सम्भवति चेत् तत् कर्तव्यमेवेति सूच्यते॥ ननु विशेषाज्ञायामपि यद्यापत्कालादिवशाद्

भगवदाज्ञप्तकार्यानिष्पत्तिस्तदापि किं भगवदाज्ञप्तमिति कृत्वा प्राणादिभयं सोढ्वापि हठेनाशक्यमपि कार्यं कर्त्तव्यमेवोत नेति प्राप्त आहुरापद्गत्यादिकार्येष्विति। भगवदीयानामेवंविधदशाप्राप्तौ भगवानेव हेतुरिति भगवदाज्ञोल्लङ्घनदोषोपि न भवतीति ज्ञेयम्। 'गति'शब्देन प्राप्तिरुच्यते। 'आदि'पदेनाशक्यार्थ उच्यते। तेनाऽऽपत्कालीनाशक्यकार्येष्वपि सर्वेषु हठ आग्रहः सर्वथा सर्वप्रकारेण त्याज्यः। चकारादिषन्निवृत्तौ पुनराग्रहः स्वीकार्य एवेत्यर्थः। यद्वा, आपद्गत्तिरादिर्येषु कार्येषु कृतेषु भवति तेष्वाग्रहो न कार्य इति। भगवदनुक्तेष्वपि कार्येष्वनापद्यपि स्पृहा न कार्येत्याहुरनाग्रहश्च सर्वत्रेति। कर्तव्यान्तरमप्याहुर्धर्माधर्माग्रदर्शनमिति। धर्मश्चाधर्मश्च तयोरग्रं पर्यवसितफलं तद्दर्शनमप्रमादेन तदनुसन्धानम्। विहितेपि कार्ये यस्मिन् कृते स्वधर्मत्यागः सम्भाव्यते, तन्न कार्यम्, स्वधर्मत्यागस्याधर्महेतुत्वात्। स्वधर्माविरोधिनश्च धर्महेतुत्वात् तत्कार्यमिति भावः ॥ ३, ४, ४½ ॥

[गो.] समर्पणानन्तरं स्वदेहादिषु स्वत्वेनाभिमानस्त्याज्यः। तत्र हेतुः स्वाम्यधीनत्वभावनादिति। स्वतन्त्रत्वेनाभिमानात्तत्तद्विषयेषु देहेन्द्रियाणां विनियोगो भवतीति तत्त्यागेन तेषु सर्वेषु भगवति समर्पितत्वात्तदधीनत्वभावनं कार्यम्। एवं सति केवलं भगवदधीनत्वानुसन्धानेन तद्व्यतिरिक्तकार्यकरणे दोषस्फूर्त्या स्वस्वामिसम्बन्धिकार्यमात्र एव स्वधर्मस्फूर्त्या च प्रभुसेवामेव करिष्यति, न त्वन्यद्, दोषरूपत्वादिति पञ्चमो विवेको निरूपितः। एतदेव "निवेदनं च स्मर्तव्य"मित्यस्य विवरणे 'सर्वदा सर्वांशेन तदीयत्वानुसन्धानेन तथा न भविष्यती'त्युक्तं श्रीप्रभुचरणैः। किञ्च, यथा स्वदेहादिष्वभिमानस्त्याज्यस्तथा देहादिसम्बन्धिभार्यापुत्रादिष्वपि स त्याज्यः। तेपि स्वात्मना सह भगवतैवाङ्गीकृता इति तदधीना इति तेषामपि योगक्षेमं प्रभुरेव करिष्यतीति सर्वदानुसन्धानेन तदर्थमपि प्रयत्नादिकरणं न भविष्यतीत्यपि भावो ज्ञापितः। तत्राप्यभिमानः सम्यक् सवासनस्त्याज्यो यथा तद्वासनापि न तिष्ठति। एतदेव "चिन्ता कापी"तिश्लोके 'लौकिकत्यलौकिकी च सा त्याज्ये'त्युक्तम् ॥

एवं श्रीमदाचार्याज्ञया विवेकादिना सेवाकरणे स्वापेक्षितवस्तुज्ञापिका भगवदाज्ञा, तं मत्याचार्याज्ञातो विशिष्टा चेज्जायते, तदा साज्ञा कर्तव्या, तदाहुर्विशेषत इति।

चेद्विशेषतः सेवाविषयिण्याज्ञा स्यात्तदा भगवदपेक्षितार्थज्ञाने तद्विशेषणस्यादि कार्यं कर्त्तव्यम्। नो चेदाचार्याज्ञानुसारेणैव कृतिः कार्या सेवायामिति भावः ॥ ननु साज्ञा कथं ज्ञायते? तत्राहुरन्तःकरणेति। भगवदीयस्यान्तःकरणे गोचरः, साज्ञा भवति, स्वप्नद्वारा तां ज्ञापयतीत्यर्थः। अथवा, एवं सेवाकरणे यतः स प्रभुरन्तकरणगोचरो भक्ताना-

मन्तःकरणे मनस्यात्मनि वा, अन्तःकरणं ज्ञानादिकार्यकरणं येनेत्यन्तःकरणे आत्मा तत्र स्थितो भवतीति शेषः ॥

एवं सति तादृक्प्रकारेण सेवाकरणे भक्तस्य सर्वांशे आत्मस्वरूपत्वेन भगवानेव स्फुरतीति साज्ञापि ज्ञायत इति । **तदा विशेषगति**र्भगवत्स्वरूपलीलयोः सम्बन्धिनी या विशेषगतिः सेवायां ज्ञाता भवेत् तदादि सर्वं स्नेहभावेन भाव्यं कर्त्तव्यं, नोचेदाज्ञानुसारेणैवेत्यर्थः । एतदेव "सेवाकृति"रितिश्लोके निरूपितं **नवरत्ने** ॥ ननु कदाचिल्लौकिककार्येष्वपि भगवदाज्ञा विशेषेण भवेत्तत्राहु**र्भिन्नमिति । दैहिका**द्देहसम्बन्धिपुत्रादिविवाहोपनयनरूपा**द्भिन्नं** यथा भवति तथाज्ञा भवति, न तु लौकिककार्ये विशिष्टाज्ञा । तेन लौकिकं तु सर्वसमर्पणानन्तरं सर्वस्य तदीयत्वानुसन्धानेन तद्दत्तप्रसादत्वेन तावन्मात्रमेवावश्यकं यत्तत्कर्त्तव्यं, न तु विशेषोत्साहेन धनादिव्ययादिकं कर्तव्यमित्यादिरूपः **षष्ठो विवेको** निरूपितः । अथवा, **भिन्नमिति विशेषगत्या**दिविशेषणम् । तेन **दैहिकाद्भिन्न**विशेषगतिकरणकथनेन विशेषाज्ञापि दैहिकविषयिणी न भवत्येवेत्युक्तं भवति, अनर्थरूपत्वात् ॥

ननु सेवायामपेक्षितधनादिसाधनाभावे सा कथं निर्वहति ? तदा ऋणादिकमपि कृत्वा सामग्र्यादिकं कार्यं (सम्पादनीयं) न वेति, तत्राहुरापद्गत्यादीति ।

आपत्प्राप्तौ यानि कार्याणि भगवद्विषयकाणि, तेषु **हठो न कार्यः** । ऋणं कृत्वापि मया सर्वं कर्तव्यमेवेति **हठो न कार्यः**, किन्तु यथालाभसन्तोषेण प्रयत्नाभावेन यत्सम्पन्नं भवति तदेव समर्पणीयम्, नान्यत् । मार्गस्थित्या यदेव समर्पयिष्यति तदेव साक्षादङ्गीकरिष्यतीति भावः । एतदेव "प्राप्तं सेवेत निर्ममः" इत्यग्रे वक्ष्यन्ति च । यत्र भगवत्कार्येष्वपि हठो न कार्यस्तत्र लौकिककार्येषु किं वाच्यमिति कैमुतिकन्यायोपि सूचित इति **सप्तमो विवेकः** ॥

ननु वैदिकेषु का व्यवस्था ? तत्राहु**रनाग्रह** इति । **सर्वत्र** स्मार्तश्रौतादिधर्मेषु **अनाग्रह एव कर्तव्यः** । भगवत्सेवामपि विहाय स्मार्तश्रौतादिधर्माचरणं सर्वथा कर्तव्यमित्याग्रहो न कर्तव्यः, किन्तु भगवदाज्ञया प्राप्तमावश्यकं कर्म सेवानवसरे कर्तव्यमित्यर्थः । चकारात्साक्षाद्भगवत्सम्बन्धिव्यतिरिक्तसर्वेष्वप्यनाग्रह एव कर्तव्य इत्य**ष्टमो विवेकः** ॥ ननु वैदिकधर्मेष्वनाग्रहः कथं भवेत्तत्राहु**र्धर्माधर्मेति** । धर्माणां स्मार्तादीनामधर्माणां तत्तदकरणजनितानामग्रदर्शनं पर्यवसानविचारः कर्तव्यः । यस्मिन्कृते अधर्मो भवेत् स न कर्तव्य इति भावः । स्मार्तश्रौतभगवद्धर्मास्तु उत्तरोत्तरबलिष्ठाः । तत्र यथा श्रौतविधौ स्मार्तत्यागे न दोषस्तथा भगवद्धर्मकरणे उभयविधस्यापि त्यागे न दोषः, सर्वाधिकबलवत्त्वादिति विचार्य

तद्धर्माणां गौणत्वात्स्वधर्मत्वाभावाच्चानाग्रह एव कर्तव्य इति **नवमो विवेक** उक्तः। यत्तु कर्मादिकरणं तद्भगवदाज्ञया मार्गेऽप्रामाण्यशङ्काभावायेति ज्ञेयम् ॥ ३, ४, ४½ ॥

[गो. उ.] सेवकैः सर्वदा स्वाम्यधीनत्वमेव मनसि भावनीयं, दासधर्मत्वात्। ल्यब्लोपे पञ्चमी। तथा च स्वाम्यधीनत्वभावनं प्राप्य अभिमानः सर्वथा सम्यक् त्याज्यः। सवासनस्त्याज्य इत्युपसर्गः। अथवा, लौकिकस्त्याज्यो, न त्वलौकिक इति विवेकार्थमुपसर्गः। चकारादन्येपि कामक्रोधादयः॥ ननु भगवदीयानां लौकिकं वैदिकं वा यदि विशेषतः कार्यं कर्तव्यं स्यात् तदा केन प्रकारेण कर्तव्यमिति चेत्तत्राहुर्विशेषतश्चेदिति। यदि **विशेषतो** भगवदाज्ञा **स्यात्** तदा विशेषः प्रकारः सर्वोपि कर्तव्यः, न तु भगवदाज्ञां विना। साप्यन्तःकरणपूर्विका, न तु क्रोधेन परिहासेन वा। तदाहुरन्तःकरणगोचर इति। अजहल्लिङ्गमिदं पदम्। तेन लौकिक आवश्यके व्यवहारे नाज्ञापेक्षा, वैदिकेपि नित्यकर्मणि वेदरूपसामान्याज्ञयैव तत्करणम्। तस्माद्भगवदीयानां लौकिके वैदिके वा विशेषकार्ये कर्तव्ये भगवदाज्ञापेक्षा ॥

अत एव राजसूयोद्यतेन धर्मराजेन विज्ञापितं 'यक्षे विभूतीर्भवत' इति। लौकिकेपि यावदावश्यकं तावदेव कर्त्तव्यमधिकं तु भगवदाज्ञातः। **गतिर्गमनम्**, तेन विशेषगतिस्तीर्थादियात्रा। **आदिपदादन्यदप्यागन्तुकम्**। तथा च यत्किञ्चिदप्यागन्तुकं कार्यं तत्र भगवदाज्ञापेक्षा। उत्पत्त्यर्थस्य भूधातोर्ण्यें, तस्य भावयत्युत्पादयतीत्यर्थः। तथा च भाव्यते क्रियत इति **भाव्यं** कर्त्तव्यमित्यर्थः॥ ननु पुत्रादीनामुपनयनविवाहादावाज्ञामपेक्षेत न वेत्याशङ्क्य, नेत्याहुर्भिन्नं तु दैहिकादिति। दैहिकाद्भिन्नं विशेषकार्यमाज्ञाय कर्तव्यं, न तु दैहिकमित्यर्थः। तुशब्दः सन्देहवारकः। तेन पुत्रादीनामुपनयनविवाहादिकरणे नाज्ञापेक्षा, किन्तु निर्वाहमात्रं कर्त्तव्यं, न त्वधिको वृथा व्ययादिः कर्त्तव्यः॥ ननु विपदादौ कथं व्यवहर्त्तव्यमिति चेत्तत्राहुरापद्गत्यादीति। आपद्गतिरापत्प्राप्तिस्तत्र यानि कार्याणि तेषु **हठो न कार्यः**, किन्तु यथासौकर्यमेव विधेयम्। **आदिपदाद्भगवदाज्ञा**, आचार्याज्ञा, भगवदीयानामाग्रहः। तेष्वपि स्वकीयो हठो न कार्यः॥ ननु विपदादौ हठेऽपि का क्षतिः, भगवतैव तद्धठनिर्वाहात्, न हि भगवान्कदाचिदपि स्वकीयानुपेक्षते, 'ये यथा मां प्रपद्यन्त' इति भगवत्प्रतिज्ञानादिति चेत्, सत्यम्, परन्त्वन्यथैव कार्यसम्भवे प्रभौ सङ्कोचदानस्यानुचितत्वात्, हठविषयस्य भगवदनभिप्रेतत्वे निर्वाहाभावाच्च॥ ननूक्तमेव मया भगवान् कदाचिदपि प्रपन्नं नोपेक्षत इति तत्कथमनिर्वाह इति चेत्, सत्यम्, यदि सर्वथा प्रपन्नः स्यात्, परन्तु भगवदनभिप्रेतस्य करणे प्रपत्तेरेव न्यूनत्वात्। न हि सर्वथा प्रपन्नो यः स भगवदनभिप्रेतं कदाचिदपि करोति। तेन सर्वथा प्रपत्त्यभावे भागवतोपि नावश्यको हठनिर्वाहः॥ नन्वनभिप्रेतत्वं तेन

कथं ज्ञातव्यमज्ञाते तु न तस्य दोष इति चेत्, सत्यम्, तथापि सन्देहेपि हठस्यानुचितत्वादित्यलं विस्तरेण। एतत्सर्वमभिसन्धायाहुः सर्वथेति। सर्वथा सर्वैः प्रकारैः। तथा च केनापि प्रकारेण हठो न कर्त्तव्य इत्यर्थः॥

एवं भगवत्कृत्येषु विचार्य लौकिकेषु व्यवस्थामाहुरनाग्रहश्चेति। सर्वत्र लौकिके व्यवहारोऽनाग्रहेण कर्त्तव्यः, किन्त्वौदासीन्येन व्यवहर्त्तव्यम्। न केवलमौदासिन्यमेव कर्त्तव्यं लौकिके, किन्तु भक्तिविरोधिलौकिकांशस्य त्यागोपि कर्त्तव्य इति चकारार्थः। किञ्च, धर्माणामधर्माणां च पर्यवसानविचारेण तदनुसारेण व्यवहर्त्तव्यमित्याहुर्धर्माधर्माग्रदर्शनमिति। एके स्मार्तधर्मा, अपरे श्रौतधर्मा, अन्ये भगवद्धर्माः, ते सर्वेपि सम्प्रदायप्रपत्तिभेदेन द्विविधा उत्तरोत्तरबलिष्ठाः। तत्र स्वाधिकारो विचार्यः। यदि भगवदाज्ञा भवति तदा सापि विचार्या, भगवदिच्छा च विचार्या, आचार्याज्ञा च विचार्या। तथा च धर्माधर्माणां बलाबलमेतत्सर्वं च विचार्य यथा क्रियमाणे पर्यवसाने उत्तमं भवति तथा करणीयम्। तेनैवं पदयोजनिका। धर्माणामधर्माणां च यदग्रं पर्यवसानं तस्य दर्शनं विचारः कर्त्तव्य इति शेषः॥ ३, ४, ४३॥

[व्र.] अभिमानो गर्वः। यौगिकार्थग्रहणे अभितः उभयतो मानोऽभिमानः, स्वतः परतश्च चित्तसमुन्नतिः पूजा वा। तत्सर्वमत्राभिमान इत्यनेन सङ्गृह्यते। चकारात्तत्साधनादिश्च। स सम्यक् लौकिकप्रकारेण त्याज्यः। तत्र हेतुः स्वाम्यधीनत्वभावनादिति। ल्यब्लोपे पञ्चमी। स्वस्य स्वाम्यधीनत्वं विभाव्य त्याज्य इत्यर्थः। कामनामूलं हि गर्वश्चित्तोन्नतिः पूजा च। अहमीदृशः, ईदृशकुलोत्पन्नः, ईदृग्भिः प्रशस्यः, इत्याद्यनुसन्धान एव, तदनुरूपकामनादर्शनात्। तदनुत्पत्तिर्निवृत्तिश्च स्वाम्यधीनत्वभावनया, तद्वतां तददर्शनात्। किञ्च, गर्वादिजनकस्य स्वोत्कर्षस्यापि तदधीनत्वमेव तस्य सर्वकारणत्वाद्भावनीयम्। तथा सति यथेदं सम्पादितवान् तथाऽन्यदपि सम्पादयिष्यतीत्यपार्था कामना, तन्मूलो गर्वादिश्चेत्यादिभावनेन तन्निवार्य विवेको रक्षणीय इति भावः। एतेनेदमपि ज्ञापितं यद्भक्तानां दासत्वान्न स्वतोभिमानसम्भवः, किन्तु दुःसङ्गादिवशात्। सोपि दासधर्मस्य स्वाम्यधीनत्वस्य भावनात्त्याज्यः। कदाचित्प्रभुः कृपया तदधीनत्वं स्वस्मिन् प्रदर्शयेत्तथा वा सेवां कारयेत्तदापि तद्भावनात्स न कार्यस्त्याज्यश्च। यदि वा स्वतन्त्रेच्छत्वाद्दण्डं कुर्यात्तदा खेदोपि त्याज्य इति। चकारोऽनुक्तसमुच्चायकः। अत्र हेतुवचनाद्देहाभिमाननिवृत्तिस्तु न विवक्षितेति प्रतिभाति। अथ विवक्षिता तदा सेवनशरणागतप्रतिकूलदेहाध्यासनिवृत्तिर्ग्राह्येति न विवादक्लेशः। एवमान्तरो रक्षणप्रकार उक्तः। अतः परं बाह्यं वदिष्यन्त उक्तरीत्याभिमानत्यागेन रक्षणे तत्सिद्ध्यभिज्ञापकं भगवदाज्ञारूपमवान्तरफलमिव प्रदर्शयन्तस्तस्यां स्वाज्ञाविरुद्धायामुभयतः

पाशारज्जुरिति शङ्कामपि वारयन्तः, प्रयोजकविभागेन स्वरूपविभागेन विषयविभागेन च व्यवस्थामाहुर्विशेषत इत्यादि ।

उक्तहेतुर्हेतुपञ्चम्या अत्राप्यन्वेति । अन्यथास्य ग्रन्थस्याकस्मिकता स्यात् । सेवादेर्हेतुत्वपक्षेऽपि स्वाम्यधीनत्वभावनस्य तत्राप्यावश्यकत्वात्सहकारित्वमदण्डवारित्वमेव । तथा च तस्मात्तत्सहकृतसेवादेर्विशेषतः श्रीमदाचार्याज्ञातो विशेषमाधिक्यं विषयीकृत्य वाऽऽग्रहबोधकप्रकारतो वा दैहिकादाधिक्यं वैलक्षण्यं विषयीकृत्य वा चेद्भगवत आज्ञा स्यात् तदा तत्प्रयोजकं विचारणीयं, किमयमन्तःकरणगोचरो न वा । अजहल्लिङ्गमिदम् । अन्तःकरणमभिप्रायस्तस्य गोचरः विषयभूता अभिप्रायप्रयुक्ता न वेति । किञ्च, अन्तःकरणस्य गोचरः, अन्तःकरणे विषयत्वेन भाता, न तु स्वामी, न वान्यद्द्वारिकेति स्वरूपमपि विचारणीयम् । न चैवं सकृदुच्चारितः शब्दः सकृदर्थं गमयतीति नियमभङ्ग इति शङ्क्यम्, प्रायिकत्वात् । अन्यथा श्लिष्टप्रयोगोच्छेदप्रसङ्गात् । अतोऽर्थद्वयमप्यत्र सङ्ग्राह्यम् । तत्र यद्यन्तःकरणप्रयुक्तत्वेनान्तःकरणे भाता स्वामीप्रभृतित उत्कृष्टत्वेन च भाता, तदा तु दैहिकादेहसम्बन्धिनो भिन्नमाज्ञप्तं विशेषगत्यादि भाव्यमुत्पाद्यं कार्यमिति यावत् । तथा चायमर्थः । आज्ञाविषयविचारेण तत्प्रयोजकं निश्चेयम् । यदि दैहिकविषया तदा नाभिप्रायपूर्विका, किन्तु परीक्षार्था, तदा ततोऽवगतं विशेषगतिसाधनादिकं न कार्यम् । यदि स्वसेवाविषया, यदि वा सेवाप्रतिबन्धकनिवर्त्तकविषया तदा साभिप्रायपूर्विका, ततस्तदवगतो विशेषः सामग्र्यादिविषयस्तादृशी गतिस्तीर्थदेशान्तरादिविषया, आदिपदेन तादृशं तत्साधनं च कार्यम् । तेन बाह्यतो रक्षणमान्तरस्य स्वनुष्ठितत्वाभिज्ञानमाज्ञाद्वयं विरोधपरिहारश्चेति सर्वं सामञ्जस्यमिति भावः । पुष्टिमार्गस्य नानाविधस्यापि कृपात एव प्रकटनात्, "सर्वधर्मान् परित्यज्य" "तस्मात्त्वमुद्धवोत्सृज्य" "भज तमखिलसंशयाधि"मित्यादिवाक्यैः शरणागतौ सेवायां च भगवत्तात्पर्यात्, "अनन्याश्चिन्तयन्तो मा"मितिवाक्येन भगवत एव जीवस्याखिलनिर्वाहकत्वावगतेश्च नात्र कोपि शङ्कालेशः ॥

ननु दैहिकातिरिक्तविषयायां भगवदाज्ञायां जातायां यदि तद्विरोधिनी काचिदापदन्तरा समागता तदा आज्ञायाः करणे निर्वाहाभावादाज्ञप्ताऽसिद्धिः, अकरणे तद्भङ्गात् स्वामिद्रोह इत्युभयतः पाशारज्जुरित्यतस्तत्रोपायमाहुरापदित्यादि ।

उक्तहेतुरत्राप्यनुवर्त्तते । आपदो गतिः प्राप्तिरापद्गतिः, सा आदौ येषां, तादृशानि यानि कार्याणि, अशक्यार्था इति यावत् तेषु "स्वाम्यधीनत्वभावनात्" हठस्त्याज्यश्चाग्रहस्त्याज्यः । चोऽप्यर्थे । अयमाशयः, निर्वाहो ह्यभिप्रायस्य लिङ्गम् । प्रतिबन्धकापाते निर्वाहाभावात्साऽऽज्ञा नाभिप्रेता, परीक्षार्थैवेति निश्चेयम् । न हि भगवतो भक्ताऽऽपदभिप्रेता, न

वा कालादयस्तत्र प्रभवन्ति, "ये त्यक्तलोकधर्माश्च मदर्थे तान्विभर्म्यह"मिति वाक्यात्। अत आपत्पराभूताया आज्ञायाः परीक्षार्थत्वेनानभिमेतत्वान्नोक्तदोषः। किञ्च, हठेऽनिष्टसम्भवात्सेवाप्रतिबन्धः पर्यवस्यतीतीत्यतो हठो न कार्य इति ज्ञापनाय सर्वथेति। उक्तसमुच्चयार्थश्चः। एतेनैवंकरणे हेत्वनुसन्धानप्राबल्यादभिमाननाशे विवेकपोषणम्, हठे तु तन्नाश इति द्वितीयं कायिकं हठत्यागेन करणरूपं रक्षासाधनमुपदिष्टम्। अथ दैहिकादिविषये व्यवस्थामाहुरनाग्रह इत्यादि। सर्वत्र दैहिके तत्सम्बन्धिसम्बन्धिन्यन्यस्मिँश्च कार्ये अनाग्रहः, "कार्य" इति शेषः। चोऽनुक्तकार्यान्तरसमुच्चायकः। तथा च स्वतःसिद्धावतिसुखसाध्ये च न विचारः, सायासमप्यौदासीन्येन कार्यं, तेन विवेकपोष इति भावः। अत्र हेत्वनुवृत्तिर्बोध्या॥ नन्वस्त्वेवं लौकिके, परं वैधस्य तु सामान्याज्ञाविषयत्वादाग्रहः प्रसज्येतैवेति चेत्तत्रोपायमाहुर्धर्मेत्यादि। धर्माधर्मयोर्विहितनिषिद्धयोरग्रं पर्यवसितं परिणामस्तस्य दर्शनं विचारस्तत्कार्यमिति शेषः। पौराणस्मार्त्तश्रौतानामुत्सर्गतो बलिष्ठत्वं, तथैव शारीरात्मभागवतधर्माणाम्, तेषु स्वयं तादृशे भगवद्धर्मे निष्ठितस्तदविरोधिपरिणामकः कार्यः, इतरो न कार्यः। तथा अधर्मोपि म्लेच्छसम्भाषणानुसरणादिरूपो बुद्धिमकलुषयन् स्वधर्मनिर्वाहाय चेद्युक्त्या कार्यः, इतरस्तु न कार्य इति। तत्रापि "स्वाम्यधीनत्वभावनाद्यथा तत्सिद्धिस्तथा विवेकरक्षणमनुसन्धेयमिति भावः॥ ३, ४, ४½॥

[दी.] उपसंहरन्ति [विवेकोऽयमिति]।

[गो.] एवं भगवत्सेवाविषयकविवेकानुक्त्वोपसंहरन्ति विवेकोऽयमिति।

[गो. उ.] उपसंहरन्ति विवेकोयमिति।

[व्र.] एवं सपरिकरं विवेकं निरूप्योपसंहरन्ति विवेकोऽयं समाख्यात इति।

## विवेकोऽयं समाख्यातः

[गो.] भगवत्सेवायां प्रवृत्तस्यायं विवेकः सम्यक्प्रकारेण विस्तरेण आख्यातः। एतादृशविवेकेन प्रवृत्तस्य सेवानिर्वाहो भविष्यतीति भावः॥ ४¾॥

[गो. उ.] अयमेव विवेको न त्वन्य इति ज्ञापनायायमिति। सविस्तरमवान्तरभेदनिरूपणपूर्वकमिति समिति। आख्यातः कथितः॥ ४¾॥

[व्र.] अयं न त्वन्यो विवेकः। सम्यक् रक्षाप्रकारोपदेशपूर्वकमाख्यातः प्रमाणयुक्तिगर्भाभिरुक्तिभिः कथित इत्यर्थः॥ ४¾॥

[दी.] क्रमप्राप्तं धैर्यं निरूपयन्ति [धैर्यमिति]।

[गो.] एवं विवेकेन सेवायां प्रवृत्तस्य बहिर्भजनसिद्धिप्रकारमुक्त्वा धैर्यं विना सेवा न सिद्ध्येदिति मुख्यमान्तरमिति तत्सिद्ध्यर्थं धैर्यं निरूपयन्ति धैर्यमिति।

[गो. उ.] उद्देशानुसारेण धैर्यं लक्षयन्ति धैर्यमिति।

[व्र.] एवं विवेको निरूप्यातः परं प्राप्तावसरं धैर्यं निरूपयन्ति धैर्यं तु विनिरूप्यत इति।

धैर्यं तु विनिरूप्यते ॥ ५ ॥
त्रिदुःखसहनं धैर्यमामृतेः सर्वतः सदा।
तक्रवद्देहवद्भाव्यं जडवद्गोपभार्यवत् ॥ ६ ॥

[दी.] त्रयाणां दुःखानां समाहारस्त्रिदुःखम्। दुःखस्य त्रिविधत्वं त्वाधिभौतिकादिभेदेन कायिकादिभेदेन वा कालकर्मस्वभावैर्वा। तस्य सहनं तत्प्रतीकारं विनानुभवः। तदप्यामृतेः। मृतिर्मरणं वर्तमानदेहत्यागः, तं मर्यादीकृत्य। तदपि न, यत्किञ्चित् परिगणितनिमित्तात्, किन्तुः सर्वतो भगवदिच्छातो यद्यदुपस्थितं तत्तत्सर्वं सोढव्यमेवेति भावः। तदपि न कालनैयत्येन, किन्तु सर्वदा। 'आमृते'रित्यनेन सर्वकालीनत्वे सिद्धेपि सर्वदेति पुनः स्पष्टार्थं वचनम् ॥ नन्वनवरतदुःखसहनेन शरीरशोषात् तन्नाशोपि स्यात्, तन्नोचितमिति न दुःखं सोढव्यमिति चेत्तत्राहुस्तक्रवद्देहवद्भाव्यमिति। देहहानौ शोको न कार्य इत्यर्थं प्राक्तनं दृष्टान्तत्रयं ज्ञेयम्। तच्च त्रयं, तक्रवज्जडवद्गोपभार्यवदिति। अन्वयस्तु, देहवता भाव्यं देहवद्भाव्यम्। तच्च देहवता पुरुषेण शरीरादिकमेवात्मीयत्वेन भाव्यमनुसन्धेयं दृश्यते, तादृशं तु न कार्यम्। तत्र कीदृगनुसन्धानं कार्यमित्यपेक्षायां तक्रादिषु यथा तेषामनुसन्धानं तथा स्वदेहेपि कार्यमित्यर्थः। तक्राख्यायिका तु "हत्वा नृपं पतिमवेक्ष्य भुजङ्गदष्टं देशान्तरे विधिवशाद्गणिकापि जाता। पुत्रं पतिं समधिगम्य चितां प्रविष्टा शोचामि गोपगृहिणी कथमद्य तक्रम्" इत्यादौ प्रसिद्धा। जडो जडभरतस्तदाख्यायिका पञ्चमस्कन्धतोऽवगन्तव्या। गोपैर्भ्रियते धार्यते पोष्यते वेति गोपभार्यो, (देहः) गोपीनां भगवत्सम्बन्धात् पूर्वकालीनः प्राकृतो देहस्तदपगमे यथा गोपीनां न शोकस्तथा स्वदेहेपि कार्यमित्यर्थः। अत्र गोपभार्याशब्द उच्यमाने पुंवद्भावानुपपत्तिः तेनान्यथा व्याख्यातम् ॥५, ६॥

[गो.] पूर्वमपि "चित्तोद्वेग"मित्यादिना धैर्यं निरूपितं, साम्प्रतं तु विशेषेण निरूप्यत इति विशब्दार्थः। तुशब्दः धैर्योपक्रमज्ञापकः। तल्लक्षणमेवाहुः त्रिदुःखमिति।

त्रयाणामाधिभौतिकादीनां दुःखानां सहनं धैर्यमुच्यते। तत्र देहसम्बन्धजनितं दुःखं भौतिकं, कामादिजनितमिन्द्रियसम्बन्धि तदाध्यात्मिकं, परीक्षार्थं प्रारब्धभोगार्थं वा भगवत्कृतं भगवदर्थस्यापेक्षितकरणविलम्बजनितं तदाधिदैविकम्। तेषामसहने चित्तव्याकुल-

तया सेवा न सिद्ध्येत्तदभावे सेवकस्य स्वधर्महानिरेवेति सेवासिद्ध्यर्थं तत्सहनमेव कार्यमिति धैर्यमुक्तम्। तदप्यामृतेः मरणपर्यन्तं, अथवा यावदायुरपि चेद्भवेत्तावदपि धैर्यमेव रक्षणीयम्, न त्वन्तर्निष्ठा हेया। तदपि सर्वतः देहेन्द्रियादिसर्वसम्बन्धिष्वप्येकस्य द्वयोर्वा सहनं तन्नास्ति, किन्तु सर्वतः। तदपि सदा निरन्तरं तत्सहनमिति धैर्यलक्षणमुक्तम्। अतः परं देहाभिमानस्य विद्यमानत्वाद् दुःखसहनं दुष्करमिति दृष्टान्तेन तदभिमानाकर्तव्यत्वनिरूपणात् तदुपपादयन्ति तक्रवदिति। तक्रं यथा निःसारं भवति हेयत्वेन तत्र नाभिमानः। कदाचित्तन्नाशेपि न दुःखं भवेत्। नवनीतं तु तत्सारं, तत्राभिमानो जायते, तन्नाशेपि दुःखमिति तद् गृह्यते, तथा देहादिषु तत्सम्बन्धिषु च निःसारत्वेन हेयत्वबुद्ध्या तत्राभिमानस्त्याज्यः। तत्त्यागेन तत्कृतमानापमानदुःखेष्वपि अभिमानत्यागेन दुःखं न भविष्यतीत्याशयेनोक्तं तक्रवद्देहवदिति। तक्रवद्देहवत्ता देहादिषु तत्सम्बन्धिषु च भाव्यमिति। अनेन भगवत्सम्बन्धिकार्येष्वेव नवनीतवदभिमानो रक्षणीय इति सूचितम्। तेन भगवदीयानां प्रभुसेवाकरण एव सुखं, तदभावे दुःखम्। न तु देहादितत्सम्बन्धिकृतं तद्भवतीति ज्ञापितम्। एवं भौतिकदुःखसहने दृष्टान्तं निरूप्याध्यात्मिकतत्सहने दृष्टान्तमाहुर्जडवदिति। आध्यात्मिकं दुःखमिन्द्रियादिसम्बन्धिकामक्रोधादिजन्यम्। तत्सहने जडस्य भावना कार्या। जडस्य यथा सकलेन्द्रियाणां भगवद्भावाविष्टत्वात् न तदिन्द्रियजन्यदुःखभानम्, जडत्वं च जातम्, तथा सेवायां प्रवृत्तस्यापि सकलेन्द्रियाणां तदीयत्वानुसन्धानेन स्वाभिमानाभावात् भगवत्येव विनियोगकरणे निरन्तरं तत्सेवागुणकीर्तनस्मरणावेशेन न कामादिजनितदुःखं भवेदित्याशयेनोक्तं जडवदिति। एवं सति यावत्पर्यन्तं जडवद्भावनया निरन्तरं भगवदाविष्टत्वं भवेत्तावत्पर्यन्तं तत्तदिन्द्रियदुःखसहनेन सेवा कार्या, न तु विषयभोगादिकं कार्यमिति, अतितुच्छत्वात्तदावेशेन भगवदावेशाभावाच्च। एवमाध्यात्मिकं निरूप्याधिदैविके दृष्टान्तमाहुर्गोपभार्यवदिति। प्रारब्धभोगार्थं परीक्षार्थं वा प्रभुश्चेद्विलम्बते तदा गोपभार्याणां भावना कार्या। यथान्तर्गृहगतानां जारत्वबुद्धिहेतुकप्रारब्धभोगार्थं विलम्बः कृतस्तद्भोगानन्तरं तत्प्राप्तिर्जाता तथा ममापि प्रारब्धभोगानन्तरं भगवान् दास्यत्येवेति धैर्येण दुःखं सोढव्यमिति भावः। अत एवामृतेरित्युक्तम्। तासां गुणमयदेहत्यागानन्तरमेव फलं जातमिति तद्वदत्रापि परीक्षार्थं चेद्विलम्बते तदा तद्व्यतिरिक्तानां भावना कार्या। यथा तासां रासारम्भे आगमनानन्तरं निषेधवाक्यश्रवणेपि यज्ञपत्नीवदन्यथाभावो न जातः, किन्तु स्वापेक्षिताभावजनितदुःखभरेण स्थाणुवत्स्थितानां व्याकुलसकलेन्द्रियाणामपि तद्दुःखं सोढ्वा धैर्यमवलम्ब्य तच्छरणागतिभक्तिमार्गानुसार्युत्तरदानमेवाभूत, न तु गृहादिषु प्रत्यागमनेच्छा जाता, तथास्यापि तादृग्भावनया विलम्बजनितदुःखसहनेन निरुपधिस्नेहेन मार्गस्थितौ भगवान्फलं दास्यतीति दुःखं सोढव्यमित्युक्तं गोपभार्यवदिति। किञ्च, गोपानां भार्याः,

**भार्यापदेन** भर्तुं योग्या यद्यपि, तथापि तासां तत्कृतभरणपोषणादिकं नापेक्षितं, किन्तु भगवत्कृतमेव। भगवत्कृततदभावे तासां जीवनमेव न भवति। यतस्तदुपयोगाभावे सर्वमेव भरणपोषणादिसाधनं गृहादिकं त्यक्तं भवति। एतदुपयोग एव तद्भोग्यत्वेन गृहीतो भवतीति। तथा प्रभुविलम्बकरणेपि तद्व्यतिरिक्तदेहादिसम्बन्धि पूर्वोक्तं किमपि न भावनीयं, किन्तु प्रभुः मम भरणपोषणादिकं करिष्यत्येवेतिनिश्चयेन धैर्येण स्थातव्यमिति **गोपभार्यपदेन** ज्ञाप्यते। किञ्च, श्रीमदाचार्याणां साक्षात्पुरुषोत्तमास्यत्वेन तदुक्तवाक्यानामुपनिषद्रूपत्वादत्र **भार्यापदे** ह्रस्वश्छान्दसो ज्ञेयः। स्वकीयानामेतादृश्येव बुद्धिर्भविष्यति, परन्तु कस्यचिद् भ्रान्तस्याशङ्का भवेत्तदभावार्थं पक्षान्तरमुच्यते। यद्वा, गोपानां भार्यः भरणपोषणयोग्यः, अर्थात्तेषामेव भार्यजन इति यावत्। यद्वा, गोपभार्यः भार्याणां समूहो भार्यः, गोपानां भार्यस्तत्समूह इत्यर्थः। एवं दृष्टान्तत्रयभावनया तत्तदुःखसहनेन कायमनोवाक्प्रपत्तिर्भवेत्। तथा च देहसम्बन्धिभौतिकदुःखसहने प्रथमं सेवायां प्रवृत्त्या कायिकी प्रपत्तिर्भवेत्, इन्द्रियसम्बन्ध्याध्यात्मिकदुःखसहने मनो भगवन्निष्ठं भवेदिति तत्प्रपत्तिः। ततो भगवत्सम्बन्धितत्सहने भगवत्कृतविलम्बस्य विरहात्मकत्वेन तत्स्वभावात् निरन्तरं गुणगानकरणे वचोपि तन्निष्ठं भवतीति त्रिधा प्रपत्तिर्निरूपिता। अत्रैवं ज्ञेयं, देहेन्द्रियादिसम्बन्धिनश्चेत्प्रतिकूला भवन्ति तदा सेवान्तरायत्वेन तेषां परित्यागः कर्त्तव्य इति सेवाप्रकरणे **तत्त्वार्थदीपे** निरूपितं "भार्यादिरनुकूलश्चे"दिति, तेन तत्त्यागे स्वोपयोगाभावात्ते तिरस्कारादिकं कुर्वन्तीति लोके दृश्यते। तथा सति भगवदीयस्य तु तेषु क्रोधादिकरणे बाहिर्मुख्यं सेवाप्रतिबन्धो भवेदिति तत्सर्वं प्रभुसेवार्थं सोढव्यमित्यत्र तत्सहनमुक्तमन्यथा तदभावे दुःखस्यैवाभावात् किं सहनं स्यादिति भावः ॥ ५, ६ ॥

[गो. उ.] धैर्यस्वरूपमाहुस्त्रिदुःखेति। विवेकानन्तरं धैर्य विलम्बो न कार्य इति ज्ञापनाय अव्यवधानेन पूर्वोपसंहारोत्तरोपक्रमयोर्निरूपणम्। तुशब्दः प्रकारभेदज्ञापकः। विशेषेण विस्तरप्रकारेण निरूप्यते।

**त्रयाणामाधिभौतिकाध्यात्मिकाधिदैविकानां दुःखानां सहनम्**, लौकिकायास आधिभौतिको, वैदिक आध्यात्मिको, भगवदर्थ आधिदैविकः। मरणपर्यन्तं सहनमित्याहु**रामृतेरि**ति। तत्रापि मध्ये मध्ये विच्छिद्य सहनं न साधकमित्याहुः **सदे**ति। निरन्तरमित्यर्थः। **सर्वस्मात्सहनं**, न तु तत्र हीनमध्यमत्वादिकं भावनीयमित्यर्थः। अध्यासनिवृत्तौ धैर्यं सुकरमिति देहाद्यध्यासनिवृत्तिप्रकारमाहुस्तक्रवदिति। देहवदिति, देहवता सङ्घाते **तक्रवद्भावना कार्या**। तथाहि, अत्रैवमाख्यायिका। काचिद्राज्ञी केनचित्पामरेण सम्बद्धचित्ता सती तेन सह सङ्केतं कृतवती राजानमहं मारयिष्यामि, तव भार्या भविष्यामीति।

ततः कस्मिंश्चिद्वने तं स्थापयित्वा स्वभवनमागत्य रात्रौ राजानं हत्वा तद्वनं प्रतिष्ठा। तत्र च पतित्वेन कल्पितं तं पुरुषं सर्पदष्टं दृष्टवती। तदनन्तरमितस्ततो भ्रष्टा सती कुत्रचिद्देशे गणिका बभूव। तत्र चाज्ञानात् स्वपुत्रेण सम्भुक्ता। तदन्तरं च प्रसङ्गाद् ज्ञातवती ममायं पुत्र इति। तदन्तरमत्यन्तग्लानिप्राप्त्या शरीरं त्यक्तुं चितां प्रविष्टा। तत्रापि, वह्नितापमसहमाना ततो निर्गत्य कुत्रचिद्देशे कस्यचिद्गोपस्य भार्या बभूव। तत्र च गोरसविक्रयेण जीविकां चकार। सा चैकदा स्वसमानाभिर्बहुभिः सह तक्रविक्रयाय निश्चक्राम। मध्येमार्गं केनचित्प्रत्यूहेन पतितानि सर्वासां भाण्डानि भग्नान्यभवन्। तदान्याश्चुक्षुभुः, सा तु जहास। तदा हसन्तीं तां सर्वाः प्रपच्छुः, कथं त्वं न क्षुभ्यसि किमिति च हससीति। तदा सा स्ववृत्तान्तकथनेन पद्येनैकेनोत्तरमदात्। तथाहि,

" हत्वा नृपं पतिमवेक्ष्य भुजङ्गदष्टं देशान्तरे विधिवशाद्गणिकास्मि जाता।
पुत्रं पतिं समधिगम्य चितां प्रविष्टा शोचामि गोपगृहिणी कथमद्य तक्र"मिति॥

तदाहुस्तक्रवदिति। सप्तम्यर्थे वति। तेन यथा तस्यास्तक्रे उदासीनभावना, न त्वभिमानः, तथा सङ्घाते भावनीयमित्यर्थः। इयमाख्यायिका नान्यत्र प्रसिद्धेति सुप्रसिद्धपौराणं दृष्टान्तमाहुर्जडवदिति। तृतीये जन्मनि भरतो जडस्तस्य यथा सङ्घाते नाभिमानस्तथा भावनीयमित्यर्थः। यथा जडः स्वबन्धुषु सङ्गं त्यक्तवानुदासीनेपि रहूगणे च सङ्गं कृतवान्, तथा श्रीमत्प्रभुचरणारविन्दानुपयुक्तेषु बन्धुष्वपि सङ्गो न कार्यः, श्रीमत्प्रभुचरणारविन्दानुरक्तेषूदासीनेष्वपि सङ्गः कार्य इति जडदृष्टान्तेन सूच्यते। अत एव कर्दमं प्रति विज्ञापयन्त्या देवहूत्या 'सङ्गो यः संसृतेर्हेतुरसत्सु विहितो धिया। स एव साधुषु कृतो निःसङ्गत्वाय कल्पते' (भाग. ३-२३-५५) इत्युक्तम्, "प्रसङ्गमजरं पाशमात्मनः कवयो विदुः। स एव साधुषु कृतो मोक्षद्वारमपावृत'मित्युक्तम् (भाग. ३-२५-२०)। अत एव वृत्रेणापि प्रार्थितं "ममोत्तमश्लोकजनेषु सख्य"मिति (भाग. ६-११-२७)। यथा च प्रयत्नमकुर्वाणेपि जडे भद्रकालीसम्बन्धी विघ्नो न जातस्तथा सर्वेष्वेव भगवदीयेषु देवान्तरकृतो विघ्नो न भवतीत्यपि सूच्यते। अत एव गर्भस्तुतौ "त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्द्धसु प्रभो' इति देववचनं गीयते। किं बहुना, कालोपि न प्रभुत्वं कर्तुमिष्टे। अत एव कपिलदेवेनोक्तं "न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मे निमिषो लेढि हेति"रिति (भाग. ३-२५-३८)। अनिमेषो हेतिः कालः। अत एव यमेनाप्युक्तं 'ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः। तान्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दण्ड' इति (भाग. ६-३-२७)। वयः कालः। अत एव द्वितीयस्कन्धे द्वितीयाध्याये 'न यत्र काले'ति (भा० २-२-१७)। एवं मध्ये सुप्रसिद्धं

पौराणं दृष्टान्तमुक्त्वा पूर्वाख्यायिकायाः सत्यत्वज्ञापनाय पुनस्तत्सम्बन्धिनमेव दृष्टान्तमाहु-र्गोपभार्यावदिति। गोपेन भ्रियते पोष्यत इति गोपभार्या, तस्या देहस्तत्र यथा तस्या उदासीनबुद्धिस्तथा देहादौ भाव्यमित्यर्थः॥ ननु तक्रविषयकशोकाभावकथनात्तक्रविषयक-मौदासीन्यं तस्या आसीदित्युक्तं, परन्तु देहादौ तस्या उदासीनभावः कथं निर्धारीति चेत्, सत्यम्, यदि देहादावासक्तिस्तस्याः स्यात्तदा तक्रविक्रयेण जीवन्त्यास्तस्या देहादिपोषके तक्रे कथमौदासीन्यं स्यात्? तेन ज्ञायते तस्या उदासीनबुद्धिरेव देहादौ॥ ननु प्रतीकारा-शक्त्या कृतोपि शोको व्यर्थ इति शोकं न कृतवती, न त्वनासक्तिर्देहादाविति चेन्मैवम्, प्रतीकाराशक्तिं ज्ञात्वा प्रतीकारोद्यमं मा कुर्यात्, शोकाभावस्तु दुर्निवारः। यो देहो राज्य-दशायामनेकदेहपोषकः सर्वसम्पत्तिसम्पन्नः सर्वसुखसन्दोहनिधानमासीत्स एव देहः पश्चात्पा-मरेण गोपेन पोष्यः, सर्वसम्पत्तिशून्यः, सर्वदुःखनिधानमजनीति ज्ञापनाय गोपभार्यात्वेन निर्देशः। तथा च, यदर्थं धैर्यं त्यक्तव्यं ताः सम्पदश्चञ्चला इव चञ्चला इति। किमिति। सर्वदा स्थायिसकलपुरुषार्थप्रतिक्षणपोषकं प्रभुपादपद्मं (कथं) परित्यक्तव्यमिति भावः। तथा च देहवता तक्रवज्जडवद्गोपभार्यावत् स्वदेहादौ भाव्यमित्यर्थः पर्यवसन्नः। देहवता भाव्यमिति तृतीयासमासः। देहवता देहाभिमानवता तेन यत्किञ्चिदभिमानोपि संरक्ष्यः। तथा च भगवत्सेवादिविषयकः सर्वथा संरक्ष्यो, लौकिकविषयकस्त्याज्य इति भावः। यद्वा, देहवतेति मनुष्याधिकारकत्वनियमो व्यावर्तितः। तेन पश्वादिशरीरेप्येवं भाव्यमिति भावः। अत एव भरतस्य हरिणजन्मन्यप्यध्यासनिवृत्तिः। तदुक्तं "तस्मिन्नपि कालं समीक्ष्यमाणः सङ्गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कतृणपर्णवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृग-शरीरं तीर्थोदकं क्लिन्नमुत्ससर्जेति तस्मिन्पुलहाश्रमे"। अथवा, त्रिदुःखसहनमिति। भक्ति-विरोधिदुःखनिवृत्त्युपायाकरणेन त्रयाणां कायिकवाचिकमानसिकानां दुःखानां देहपातपर्यन्तं सर्वेभ्यः सहनं धैर्यमित्यर्थः। स्वशरीरस्वीयवस्तुनोरासक्त्याधिक्ये दुःखाधिक्यसम्भवाद्धैर्यम-शक्यं स्यादिति तादृश्यासक्तिर्न कार्येति दृष्टान्तैराहुस्तक्रवदित्यादि। जडेन तुल्यं जडवत्, तृतीयासमर्थाद्वतिः। देह इव देहवत्, सप्तमीसमर्थाद्वतिः। जडभरतेन स्वदेह इव देहेष्वा-सक्तिः कार्येत्यर्थः। गोपभार्यावद्गोपभार्यया तुल्यं, गृहे स्थितायाः स्त्रिया भरणीयत्वात्। भार्यात्वाभावाद्वस्तुत्वेन नपुंसकतानिर्देशः। तक्रवदिति सप्तमीसमर्थाद्वतिः। गोपभार्यया स्वतक्र इव स्ववस्तुष्वासक्तिः कार्येत्यर्थः। तेन स्वशरीरवस्तुनोर्निर्वाहार्थमासक्तिं कृत्वा जडभरतेनेव भगवत्परतया स्थेयमिति भावः॥ ५, ६॥

[व्र.] पूर्वोक्तरीत्या विवेकरक्षणे जिह्वोपस्थजयादिरूपस्य धैर्यस्य प्रसङ्गत एव सिद्धेरतन्नि-रूपणं न प्राप्तावसरमिति शङ्कानिरासाय तुशब्दः। विवेकस्वरूपे हृदयारूढे धैर्यं स्वत एव

भवेत्, परं याथात्म्येन स्वरूपे अज्ञातेऽरक्षणे च कदाचित्किञ्चिदपेयादपि, अतस्तदर्थं विशेषेण निरूप्यते रक्षणोपायसहितं कथ्यत इत्यर्थः ॥

विवक्षित धैर्यस्वरूपमाहुस्त्रिदुःखेत्यादि ।

आमृतेः सर्वतः, "मृति"शब्दो मरणकाललक्षणः । "मृति"जनकं मर्यादीकृत्य सर्वस्मात् सदा सर्वकाले त्रिदुःखसहनं त्रयाणामाधिदैविकादिभेदभिन्नानां कायिकादिभेदभिन्नानां कालकर्मस्वभावजानां "त्रैवर्गिकायासविघाते"ति वृत्रवाक्यात् त्रिवर्गसम्बन्धावच्छिन्नानां च सहनं मर्षणमुपेक्षणमप्रतीकारयुक्तोऽनुभवो धैर्यमित्यर्थः ॥ ननु भगवदीयानामाधिदैविकादिदुःखसम्भावनैव नास्ति, यतः कालादयोपि न तद्दुःखहेतवो भवन्ति इति कथं तत्सहनोक्तिः, इति चेत् [दुःखदाने समर्थाः, न चलाचलास्थेष्वेव तथा, नेतरेष्विति वाच्यं, बाधकाभावात्, भगवदीयत्वस्य तुल्यत्वात् । ततः कथं त्रिदुःखःसहनोक्तिरिति चेत्], भगवता धैर्यपरीक्षार्थं कालादयस्तथा प्रेर्यन्ते, अतः पूर्वं भगवद्भयादेव न प्रवृत्तिस्ततस्तदाज्ञयाऽऽज्ञाभङ्गभयात्प्रवृत्तिरपि सम्भवति, यतो भगवतैवोच्यते "मद्भयाद्वाति वातोय"मित्यादि, श्रुतिश्च, "भीषास्मा"दि त्यादि। अयं न्यायः कालादावपि तुल्यः, भगवन्नियम्यत्वस्य तत्रापि समानत्वादिति ॥ ननु भगवतः सर्वज्ञत्वेन परीक्षाकरणमपि न सम्भवति तत्कथं परीक्षार्थं तथाकरणम्, किञ्च, परीक्षार्थं भक्तेषु दुःखं ददातीत्यपि वोचितमिति चेद्, अत्रापि वदामः। भगवति सर्वज्ञत्वादिधर्मास्तु ज्ञानादिमार्गे साधारणेच्छायां प्रकटाः । पुष्टिमार्गे विशेषरमणेच्छायां तद्रीत्यैव सर्वं करोतीति नानुपपत्तिः। यतः "स्वागत"मित्यादिना अन्तरङ्गभक्तेष्वपि परीक्षैव कृता । द्वारकालीलायामपि "अव्यक्तलिङ्गं प्रकृतिष्वन्तःपुरगृहादिषु । क्वचिच्चरन्तं योगेशं तत्तद्भावबुभुत्सये"ति लोकरीत्यापि तथाकरणमुक्तम्। अपरं च, "मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी"ति भगवता भक्तिमार्गरीत्या भक्तातिरिक्ताज्ञानं स्वस्योक्तम् । तेन ज्ञायते भक्तिमार्गे लौकिकरीतिमेव भूयः प्रदर्शयतीत्यतोपि नानुपपत्तिः काचित् । किञ्च, दुःखदानस्यायुक्ततायामप्युच्यते । साक्षात्स्वरूपात्मकाश्रयदानार्थमेव धैर्यपरीक्षा क्रियते इति बालाध्यापनार्थताडनवत्, पर्यवसानतः सुखरूपत्वमेवेति नोक्तशङ्कालेशः ॥ प्रकृतमनुसरामः। धैर्यस्वरूपमुक्त्वा दृष्टान्तपुरःसरं तद्रक्षणप्रकारमाहुस्तक्रवदित्यादि । भाव्यमित्यस्य त्रिष्वप्यन्वयः । तक्रवतो राजकलत्रस्य देहस्तक्रवद्देहस्तेन तुल्यं स्वदेहादौ भाव्यमित्यर्थः । इयं चाख्यायिका—

"हत्वा नृपं पतिमवेक्ष्य भुजङ्गदष्टं देशान्तरे विधिवशाद्गणिकास्मि जाता ।
पुत्रं पतिं समधिगम्य चितां प्रविष्टा शोचामि गोपगृहिणी कथमद्य तक्र"मिति

श्लोके प्रसिद्धा । तथा च, तया यथा स्वदेहादिपोषणसाधनीभूते तक्रे गते स्वदेहा-

वस्थामनुसन्धाय शोकाभावपुरःसरमप्रतीकारेण दुःखमेव सोढं, तथा स्वस्याधिभौतिकलौकिकसाधनीभूतधनपुत्राद्यपगमेऽपि शोकमकृत्वा अप्रतीकारेण दुःखसहनार्थं तथा भावनीयम्। वैष्णवत्वलाभानन्तरं तेषां हेयतैव यतः। अत एव निबन्धेऽपि श्रीमदाचार्यैः "प्रतिकूले गृहं त्यजे"दित्यादिना त्याग एव तेषामुक्तः। अथवा, दृष्टान्तद्वयमिदम्। तत्र पूर्वो व्याख्यातः। द्वितीयस्तु, "देहः किमन्नदातुर्वा निषेक्तुर्मातुरेव वा। मातुः पितुर्वा बलिनः क्रतुरग्नेः शुनोऽपि वे"ति देहः साधारणो नात्मीयस्तथा सर्वेऽपि तत्तद्दृष्टसम्पादितत्वात्साधारणा इत्येवं तदर्थमनुसन्धेयमित्यर्थः। भौतिककायिककर्मजार्थिकदुःखसहने दृष्टान्त उक्तः। आध्यात्मिकसहने दृष्टान्तमाहुर्जडवदिति। यथा जडभरते मुक्तिसाधनसत्त्वेऽपि तेन पूर्वं मृगशरीरप्राप्तिजन्यं ततो भ्रातृजायादिकृतं भद्रकालिबलिदानसमयपर्यन्तं, ततो रहूगणशिबिकावाहनसामयिकं सोढं, तथा आध्यात्मिककालजादिदुःखं सोढुं, तद्वद्भाव्यम्। किञ्चैतद्देहानन्तरं [वृन्दावनीयमृगादिभवने तदनन्तरं] साक्षात्सेवोपयोगिदेहे विप्रयोगादिदुःखेऽपि तत्सोढुं जडवदधुना भावनीयमित्यर्थः। किञ्च, भाव्यमित्यनेन अवश्यं भाव्यत्वमपि द्योत्यते। तेनाप्रतीकार्यत्वात्तन्निवारणार्थं यत्नो न कर्त्तव्य इत्यपि सूच्यते। आधिदैविकस्वाभाविकादिसहने दृष्टान्तमाहुर्गोपभार्यवदिति। भार्याणां समूहो भार्यं, गोपानां भार्यं गोपभार्यं, तेन तुल्यं भाव्यम्। यथान्तर्गृहगतो गोपानां भार्यासमूहो भगवद्विरहेणातिदुःखं सोढ्वा ततो ध्यानप्राप्तभगवत्सान्निध्यसुखमनुभूयापुण्यपुण्योपरमे निर्गुणदेहेन भगवन्तं प्राप्तस्तथाहमपि प्रारब्धादिसम्भवमुभयं सोढ्वा प्राप्स्यामीति दुःखसहनार्थमनुसन्धेयम्। एवं प्राप्ते प्रायिकत्वनिरासाय समूहदृष्टान्त इति सर्वं सुस्थम्॥ ५, ६॥

[दी.] भगवदिच्छातः प्राप्ते दुःखे यथाऽप्रतीकारस्तथा तदिच्छाप्राप्ते स्वप्रयत्नं विनैव दुःखप्रतीकारेऽपि मम सुखं मास्त्विति बुद्ध्या दुःखाभावसम्पादकहेतुनिवृत्तावाग्रहं न कुर्यादित्याहुः **प्रतीकारो यदृच्छात** इति।

[गो.] ननु तिरस्कारादिना ते चेद् दुःखं न प्रयच्छेयुस्तदापि किं तेषां त्याग एव कर्त्तव्य इति चेत्तत्राहुः **प्रतीकार** इति।

[गो. उ.] ननु यदुक्तं 'त्रिदुःखसहनं धैर्य'मिति तत्र यदि कदाचित् स्वत एव दुःखप्रतीकारः सिद्धस्तदापि किं तं प्रतीकारं निवार्य दुःखं सोढव्यमेवाहोस्वित्प्रतीकारेण तद् दुःखमपोह्यम्? इति सन्देहे निर्णयमाहुः **प्रतीकार** इति।

[व्र.] अतः परं यदृच्छातः प्रतीकारोपस्थितौ यदि सहनाग्रहस्तदा विवेकहानिराज्ञाभङ्गश्च, यदि तूष्णीकत्वं तदा दुःखनिवृत्त्यासहनाभावेन धैर्यहानिराज्ञाभङ्गश्चेत्युभयतः पाशायां रज्जौ समाधानार्थमाहुः **प्रतीकार** इत्यादि।

9118

प्रतीकारो यदृच्छातः सिद्धश्चेन्नाग्रही भवेत्।
भार्यादीनां तथान्येषामसतश्चाक्रमं सहेत् ॥ ७ ॥

[दी.] भार्यादीनामिति। भार्या आदिर्येषां पुत्रादीनां तथैवान्येषां पोष्यवर्गाणां, असतश्च। भार्यादिमध्ये स्वतोऽत्यन्तनिकृष्टस्य सदोषस्याप्याक्रमं तत्कृततिरस्कारमपि सहेतेत्यर्थः। अत्र सहेदिति परस्मैपदं 'सह मर्षण' इत्यात्मनेपदिनो न सङ्गच्छते यद्यपि, तथापि सहनं सह इति व्युत्पत्त्या 'अच्'प्रत्यये कृते, पश्चात्सहकरोतीत्याचरतीति वा परस्मैपदं ज्ञेयम् ॥ ७ ॥

[गो.] भगवदिच्छया प्रतीकारः सिद्धश्चेद्भार्यादयो ह्यनुकूला उदासीना वा भवेयुस्तदा तत्त्यागे आग्रहवान् न भवेत्किन्तु अनुकूलत्वे भार्यादिभिरपि सेवां कारयेदुदासीनत्वे स्वयं कुर्यात्। परन्तु तेषां तथापि योगक्षेममात्रं कर्त्तव्यं, न तु त्यागः। प्रतिकूलत्वे त्याग एव कर्तव्य इत्याशयेनोक्तं नाग्रही भवेत्। प्रतिकूलत्वाभावेपि सर्वथा त्याग एव कर्त्तव्य इत्याग्रहवान् न भवेत्। हठेन त्यागकरणे समीचीनानामपि तन्न कर्त्तव्यमिति भावः भौतिकदुःखप्रतीकारे परमियं व्यवस्था। आध्यात्मिकदुःखप्रतीकारेपि व्यवस्थोच्यते। सकलेन्द्रियाणां स्वस्वविषयभोग्यवस्तुत्यागे दुःखं भवति। तद्भगवदिच्छया स्वभोगार्थं तेषु पुरेव प्रवृत्तिरेव न भवेत् चेत्तदा तज्जनितसेवान्तरायाभावात्तत्त्यागे आग्रहवान् न भवेत्। यतस्तादृशस्य स्रक्चन्दनादिकसकलभोगसामग्री स्वप्रभुनिमित्तत्वेनावश्यमपेक्षितेति तदुपयोगे जाते तद्दत्तमहाप्रसादत्वेन स्वसौभाग्यरूपत्वेन तदुपभोगकरणे बाह्याभ्यन्तरशुद्ध्या भगवद्धर्माविष्टत्वं भवतीति न तत्त्यागः। एवं सति विषयभोगार्थं सर्वस्यापि त्यागस्तदभावे तस्यालौकिकत्वे फलमध्यपातित्वान्न तत्त्याग इति सूचितम्। इदमेवोक्तं सेवाफले 'अलौकिकभोग'स्त्वित्यादि, आधिदैविकदुःखप्रतीकारव्यवस्थामाहुः। प्रारब्धभोगानन्तरं वा भगवान् कृपया सेवोपयोगि धनादिकं दातुमिच्छेच्चेत्तदा साक्षात्परम्परया च तदिच्छया स्वप्रयत्नं विनैव तत्प्राप्तं भवति, तदपि निरुपाधिकं विहितं शुद्धं चेद् भवेत्तदा तत्त्यागे आग्रहो न कर्त्तव्यः। जन्मान्तरे प्रतिबन्धाभावार्थं मम प्रारब्धादिभोग एव भवतीति, प्रारब्धस्यापि तदधीनत्वात्। किन्तु भगवता स्वोपभोगार्थमेवेदं दत्तमिति मत्वा सर्वं भगवदर्थमेवोपयोक्तव्यं, न तु स्वार्थमिति भावः। तथा चोक्तमपि 'निजेच्छातः करिष्यती'त्यत्र स्वीयानामविकृतेच्छात इति। सिद्धान्तमुक्तावल्यामपि 'भजनोपयोग्यर्थापेक्षायामपि प्रभुणैव सर्वं सम्पाद्यत इति, तथा "कृष्णं परं ब्रह्मे"त्यस्य विवरणे। एवं सामान्यत आधिभौतिकादिदुःखसहनमुद्देशत उक्तम्। अतः परं देहादिसम्बन्धिनः क इत्याकाङ्क्षायां प्रथमं देहसम्बन्धिनो विशेषत आहुर्भार्यादीनामिति। भार्यादयो भरणपोषणयोग्यास्ते देहसम्बन्धिषु स्वसमानास्तेषां भरण-

पोषणमेवापेक्षितं, न तु धर्मः । भरणपोषणं नाम सर्ववस्तुनो देहादिपर्यन्तस्य स्वविषयको विनियोगस्तदकरणे तेतिक्रमं कुर्वन्ति, तदा तत्सर्वं सहनमेव कुर्यान्नतु क्रोधादि, तत्करणे तदावेशेन सेवान्तरायो बाहिर्मुख्यं स्यादिति । तथान्येषां बान्धवानां मित्रादीनामुदासीनानां बहिर्मुखानां च पूर्वसामयिकनित्यमिलनव्यवहाराद्यकरणेनेर्ष्यया तेप्यतिक्रमं कुर्वन्ति, तस्यापि सहनमेव कर्तव्यम् । अथवा, भक्तत्वेपि बान्धवानां बन्धुत्वस्वभावाद् विभागादिजनित-द्वेषेणापि अतिक्रमः सम्भवति । अथ च, असतश्च स्वदासतोपि, यथा भार्यापुत्रादयो देह-सम्बन्धिनस्तथा दासो धनसम्बन्धी पोष्येष्वन्तर्भवति, तेषां सङ्गेन सोपि चेदतिक्रमं कुर्यात्तदपि (दुखं) सह्यमेवेत्यर्थः । एते तु प्रतिकूला धर्मविरोधिन उक्ताः । चकारात् स्वधर्मानुरोधिनः शिष्यभक्तादयोपि ज्ञेयाः । प्रमादतो जीवस्वभावात् शिष्योप्यतिक्रमं चेत्करोति, भक्तोपि, तदा स्वप्रारब्धादिभोग एवायमिति भावनया धैर्येण तद्दुःखसहनमेव कर्तव्यं, न तु क्रोधादि । क्रोधादिकरणे तु आसुरावेशेन सेवाप्रतिबन्धो बाहिर्मुख्यं च स्यात् । किञ्च, शिष्यभक्तयोरपि प्रभुसम्बन्धो वर्तते स्वकृत एव पुनस्तत्र क्रोधकरणे तदनिष्टं कृतं भवेत् । न हि भगवदीयानामयं स्वभावो यत् (स्वकीयानां) स्वाङ्गीकृतानामनिष्टं कुर्वन्ति इति तत्सहनमेव कर्तव्यमिति भावः ॥ ७ ॥

[गो॰ उ ] यदृच्छातः, अनायासेन चेद् यदि प्रतीकारः दुःखप्रतीकारः सिद्धः सम्पन्नः स्यात्तदा आग्रही मयेदं दुःखं सोढव्यमेवेत्याग्रहवान्न भवेत् । इदमत्राकूतम् । अत्र हि भगवदा-श्रयसिद्ध्यर्थं विवेकधैर्ये उच्येते । तेन त्रिदुःखसहनरूपं यद् धैर्यं निरूपितं तदपि यदि भग-वदाश्रयनिमित्तं तदा कर्त्तव्यं, नोचेत्प्रयोजनं विना किमिति तत्कर्त्तव्यं ? ‘ प्रयोजनमनु-द्दिश्य मन्दोपि न प्रवर्त्तत ’ इति न्यायात् । अत एव केनचिदुक्तं ‘अनिषिद्धसुखत्यागी पशुरेव न संशय’ इति । न केवलं प्रयोजनाभावमात्रं, प्रत्युत विपरीतत्वमासुरत्वं च । अत एव गीतासु भगवताप्युक्तम् “अशास्त्रविहितं घोरं तप्यन्ते ये तपोजनाः । दम्भाहङ्कारसंयुक्ताः कामरा-गबलान्विताः । कर्षयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तःशरीरस्थं तान्विद्ध्या-सुरनिश्चया’निति । यदृच्छात इति । स्वयं तदर्थमायासो न कर्त्तव्य इति सूचितम् । तदर्थमा-यासकरणे स्वसर्वस्वप्रभुचरणारविन्दविस्मरणं यतः । ‘भूमिनिन्दाप्रशंसासु नित्ययोगेति-शायने । संसर्गेस्तिविवक्षायां भवन्ति मतुबादय’ इति वाक्यान्निन्दायामिनि-प्रत्ययोत्र । तथा चासदाग्रहवान्न भवेदित्यर्थः । तेनायमर्थः पर्यवसन्नः । यदि किञ्चिदपि भगवतो भगवदी-यानां वा कार्यं सिद्ध्येत् तदा स्वतः सिद्धेपि प्रतीकारे दुःखं सोढव्यमेव, तत्राग्र-हस्यासत्त्वाभावात् । न हि येन भगवतो भक्तानां वा सेवा सिद्ध्यति तस्य कदाचिदप्यसत्त्वं भवति, यतो जन्मनो लाभः स एव यद्भगवतो भक्तानां वा कार्यसाधनम् । इदमपि स्नेह-

स्यापरिपाकदशायामुच्यते । परिपाकदशायां यथा यथा स्वयं क्लेशं सोढ्वा भगवतो भक्तानां वा साधयति तथा तथा परमसन्तोष एवेति दुःखमेव नास्ति, किं सोढव्यम् ? । अभिमानस्यैव संसारत्वादपमानजनितदुःखसहनमतिकठिनम् । तत्रापि स्वापेक्षाया हीनैः कृतोपमानः सुतरां सोढुमशक्यः । तत्रापि स्वस्वाधीनैः कृतस्ततः सुतरां सोढुमशक्यस्तेन तत्सहने कदाचित्कस्यचिच्छिथिलता स्यादिति "त्रिदुःखसहन"मिति सङ्क्षेपेणोक्तमपि पुनर्विशेषत आहुर्भार्यादीनामिति । भार्या आदिर्येषामिति । सर्व एव बान्धवास्तेषामाक्रमं तत्कृततिरस्कारं सहेत् । आसमन्तात्क्रमः पादविक्षेपः । शिरसि पादप्रहारपर्यन्तमपि तिरस्कारं सहेदित्यर्थः । पुत्रा अपि कदाचिद्विभागादिना स्वतन्त्रा भवन्ति । भार्या तु केवलं भर्त्रधीनैवेति तत्कृतस्तिरस्कारो भर्तुरतिदुःसहस्तादृशोपि सोढव्य इति ज्ञापनाय प्रथमं भार्याया निर्देशः । यथैतादृशदुःसहोपि तिरस्कारः सोढव्यस्तत्रान्यसहने किं वक्तव्यमिति कैमुतिकन्यायोप्यनेन सूचितः । तथा च, प्रभुचरणनलिनयुगलसमाश्रयणाय किं न कर्तव्यमिति भावोप्यसूचि । यतोत्राश्रयनिरूपणायैव विवेकधैर्ये निरूप्येते । बन्धुष्वपि एकस्य द्वयोर्वा सोढव्यो नास्ति, किन्तु सर्वेषामिति ज्ञापनाय बहुवचनम् ।। ननु "षह"मर्षणे इति धातोरनुदात्तत्वात्सहेदिति परस्मैपदं कथं चकास्तीति चेद्, इत्थम् । "चक्षिङ् व्यक्तायां वाची"त्यत्रेकारसत्त्वेपि ङकारग्रहणं यत्तद् ङितामेवात्मनेपदं नित्यमनुदात्तेतान्तु अनित्यमिति ज्ञापयति । तेन अनुदात्तेतां कदाचित् परस्मैपदमपि भवति, अत एव पण्डितप्रवरेण बोपदेवेन कविकल्पद्रुमधातुपाठे अयमुभयपद्युक्तः । अत एव महाकविना शाकल्लमल्लेनाप्यधिमत्समंतुमसहन्त्वयन्ताविफलो भवेति मघवानमशासीदिति प्रयुक्तम् । अत एवानुक्तमप्यूहति पण्डितो जन इति प्रयोगः ॥ ननु उदासीनाश्चेत् केपि तिरस्कुर्युस्तदा किं करणीयम् इत्याशङ्क्य, तत्रापि यदि तदसहने आश्रये कश्चनान्तरायः स्यात् तदा सोढव्यमित्याहुस्तथान्येषामिति । यथातिदुःसहोपि बन्धूनां तिरस्कारः सोढव्यस्तथोदासीनानामपि तिरस्कारः सोढव्य इत्यर्थः ॥ ननु नीचश्चेत् कोपि तिरस्कुर्यात् तदा किं कार्यमित्याशङ्क्य पूर्ववदेवाहुरसत इति । असतो जात्यादिहीनस्येत्यर्थः । यदि भगवत्सेवादिकं निर्वहति तदा तदर्थं म्लेच्छादीनामपि तिरस्कारः सोढव्यः इत्यर्थः । न केवलं तेषां तिरस्कारमात्रं सोढव्यं, प्रत्युत यदि तैः प्रभुसेवादिकं निर्विघ्नं निर्वहति तदा बान्धवा उदासीना म्लेच्छादयश्च त्रयोपि अनुसर्तव्या इति चकारार्थः ॥ ७ ॥

[व्र.] यदृच्छातो भगवदिच्छातः स्वकृतोपायं विनेति यावत् । आग्रहीति निन्दायामिति, "भूमिनिन्दाप्रशंसासु नित्ययोगेतिशायने । संसर्गेस्तिविवक्षायां भवन्ति मतुबादय" इत्यभियुक्तोक्तेः । तथा च, भगवदिच्छया सिद्धे प्रतीकारे निन्दिताऽऽग्रहवान्न भवेत् । एवं चानाग्रहेऽभिसन्धानाभावाद्धैर्यस्य सिद्धिर्भगवदिच्छानुसन्धानाद्विवेकस्य आज्ञातः करणादाज्ञयो-

रप्यभङ्ग इति सर्वं सामञ्जस्यमिति भावः। यद्वैवं योज्यम्। जडवद्गोपभार्यवत् प्रतीकारो यदृच्छातः सिद्धश्चेन्नाग्रही भवेदिति। तथा च, यथा जडो भगवदिच्छया रहूगणेन संवदन् शिबिकावाहनार्थं नाग्रहवान् जातः, यथा च रासमण्डलमण्डनायितं गोपभार्ये विप्रयोगतापे भगवदिच्छया गुणगानस्मरणरूपदर्शनादिरूपप्रतीकारोपस्थितौ भगवदिच्छानुरूपमेव व्यवहृतवत्, तथा स्वयमपि स्वाधिकारानुसारेणानाग्रही भवेदित्यर्थः। तत्समूहस्यानाग्रहोऽपि श्रीमदाचार्यैः "गत्या ललितयोदारे"त्यस्याभासे "यदा पुन"रित्यारभ्य "स्वयमाविर्भूत" इत्यन्तेन, "त्वयि धृतासव" इत्यत्र "त्वदर्थमेवे" त्यारभ्य "तदैव त्यक्षन्ती"-त्यन्तेन, "दुस्त्यजस्तत्कथार्थ" इत्यत्र च स्फुटीकृतः। चेदित्यनेन तादृक्तापे शीघ्रं स्वाश्रयं दातुं प्रभुरेव प्रतीकारं सम्पादयति। न सम्पादयति चेदिति स्वयं तदर्थं न यतेत। तथा सति प्रभोरनभिप्रेतत्वेन कोपाद्वैपरीत्यापत्तिरित्यपि सूच्यते। अतः परं कायिकं रक्षासाधनमुपदिशन्ति भार्यादीनामित्यादि। भार्यादीनामिति तद्गुणसंविज्ञानो बहुव्रीहिः। तेन येत्यन्तस्वनियम्यास्तेषाम्। अन्येषां विभक्ताविभक्तबान्धवादीनामुदासीनानां च, असतो दुर्जनस्य, "दुःसहमिमं मन्ये आत्मन्यसदतिक्रम"मितिवाक्याद् दुःसहत्वात्पृथग्निर्देशः। एतेषामाक्रमं तिरस्कारं सहेत्। आक्रमपदस्य योगेन पादप्रहारपर्यन्तता बोध्यते। सहेदिति अनुदात्तत्वलक्षणस्यात्मनेपदस्यानित्यत्वात्परस्मैपदम्। ब्रह्मचारिप्रभृतीनामन्येषामेकाकिनां च भार्याद्यभावाद् बन्धभावाच्च त्रितयनिर्देशः। तेषां सेवाप्रतिकूलत्वे त्यागरूपमेव सहनम्। स्वविवेकमात्रप्रातिकूल्ये च तदप्रतीकारेण तिरस्कारमर्षणमेव सहनं तदाचरेदित्यर्थः। अत्रोपायो निबन्ध उपदिष्टः "सर्वं सहेत परुषं सर्वेषां कृष्णभावना"दिति, "एतदन्तःस्थितः कृष्ण एवास्मानुपदिशती"ति च व्याख्यातम्॥ ७॥

[दी.] तथा पूर्वं भगवदिच्छया प्राप्तस्य स्वप्रयत्नं विनैव सुखदुःखादेः सहनमुक्तमिदानीं स्वकृतिसाध्यं सुखादिकं न कार्यमित्याहुः स्वयमिति।

[गो.] एवं सेवाप्रतिबन्धकत्वेन भार्यादीनां त्यागेन तत्कृतातिक्रमसहनं निरूप्य सेवाप्रतिबन्धकत्वेन भोगत्यागेपि तत्तदिन्द्रियजनितस्याध्यात्मिकदुःखस्य सहनमाहुः स्वयमिति।

[ गो. उ. ] यथा भगवदर्थमतिदुःसहोपि तिरस्कारः सोढव्यः तथा प्रभुचरणसमाश्रयणाय प्रतिबन्धरूपः सर्वोपि सुखभोगः सुदुस्त्यजोपि त्यक्तव्य इत्याहुः स्वयमिति।

[व्र.] एवमाक्रमसहनोपदेशे गृहस्थितिरागता। तथा सतीन्द्रियकार्यकरणमर्थाक्षिप्तं, तत्राऽऽसक्तौ च धैर्यस्वरूपस्य सामर्थ्यस्य वा नाश इति तन्निवृत्त्यर्थं साधनान्तरं रक्षणस्योपदिशन्ति स्वयमित्यादि।

स्वयमिन्द्रियकार्याणि कायवाङ्मनसा त्यजेत् ।
अशूरेणापि कर्त्तव्यं स्वस्यासामर्थ्यभावनात् ॥ ८ ॥

[दी.] इन्द्रियकार्याणि तत्तदिन्द्रियसाध्यविषयभोगः । तं तु कायेन वाचा मनसा त्यजेदित्यर्थः । कायवाङ्मनसेत्यत्र द्वन्द्वैकवद्भावादेकवचनं ज्ञेयम् । दुःखं सोढुमशक्तेनापि तदर्थं वृद्धसेवनवैराग्यादिकं कर्त्तव्यं, न त्वाहत्य धैर्यमेव । तत्र हेतुः स्वस्यासामर्थ्यभावनादिति । भावनं परिदृश्यमानत्वमिति ॥ ८ ॥

[गो.] स्वयं स्वभोगार्थमिन्द्रियकार्याणि त्यजेत् सेवायां प्रतिबन्धकत्वात् । तानि च त्रिधा, कचित् कायिकानि, कचिद्वाचिकानि, कचिन् मानसानि भवन्ति । तत्त्यागकथनेन प्राकृतविषयांस्त्याजयित्वाऽलौकिकेषु तेषु तानि योजनीयानीति भावः । एवं सति यावत्पर्यन्तमलौकिकेषु युक्तानि भवेयुस्तावत्पर्यन्तं तत्त्यागजनितदुःखं भवतीति तत्सहनमुक्तमिति ज्ञेयम् । एवमाध्यात्मिकं निरूप्याधिदैविकं तदाहुरशूरेणापीति । प्रारब्धभोगार्थं परीक्षार्थं वा विलम्बकरणे स्वापेक्षितवस्तुप्राप्त्यभावात्तद्दुःखं सोढुं यद्यप्यशूरो धैर्यरहितः । यथा दरिद्रः प्रात्यह्निकभक्ष्याभावे, तथाप्यशूरेणापि तद्धैर्यं कर्त्तव्यम् । तत्र हेतुः स्वस्येति । स्वस्यासामर्थ्यं भावनीयं, पूर्वोक्तदुःखसहने स्वप्रयत्नोप्युक्तः । भगवत्कृतविलम्बे प्रयत्न एव न, तत्करणेपि विघ्नः प्रभुकृतो भवेदिति, स्वप्रयत्नसाध्यत्वाभावात् । स्वस्यासामर्थ्यभावनया 'तथैव तस्य लीले'त्यनुसन्धानेन धैर्यमेव कर्त्तव्यमिति भावः । ॥ ८ ॥

[गो. उ.] "स्वयं"पदात् श्रीप्रभुप्रसादत्वेन प्राप्तस्य विहितत्वेन प्राप्तस्य च मिष्टान्नादेः परित्यागाभावः सूचितः । अत एव "त्वयोपभुक्त"त्यादि । इन्द्रियकार्याणि सर्वेन्द्रियविषयभोगात् कायेन वाचा मनसा च स्वयं प्रयत्नेन त्यजेदित्यर्थः । अयमभिसन्धिः, "तस्मात्केनाप्युपायेन मनः कृष्णे निवेशये"दिति सप्तमे नारदवचनान्निरन्तरं भगवद्भावनादिरेव परमपुरुषार्थः । अत एव " तस्माद्भारत सर्वात्मे"त्यादि । "तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशव । म्रियमाणोऽव्यवहितस्ततो याति परां गतिम् " । अतस्तत्साधक एव परमलाभकरस्तद्विघातक एव परमहानिकरः, यतश्चिन्तनादिविच्छेदक एव परमहानिकरः । अत एव सा हानिः कालोस्ति यत "आयुर्हरति वै पुंसा"मित्यादि । भोगश्च स्मरणादिविघातकः । अतः परमहानिकरत्वेन भोगास्त्यक्तव्या इत्यर्थः ॥

नन्विदमसङ्गतम् । तथाहि, अन्येषां यथातथास्तु, भक्तानां तु विषया न बाधकाः, यतः सत्स्वपि विषयभोगेषु भक्तिरेव सर्वसाधिकास्ति । अत एव "बाध्यमानोपि मद्भक्तः" "अपि चेत्सुदुराचार" इत्यादि । अत एव प्रियव्रतप्रह्लादाम्बरीषादीनामपि राज्यादिकरणम् ।

न हि स्मरणादिविघातकेषु ते प्रवर्त्तन्ते। अतः कथं भगवद्भावविघातका विषया इति चेत्, स्वानुभवं जानन्नप्येवं वदन् निरपत्रपोसि। न हि त्वया भोगं भुञ्जानो भगवच्चरणारविन्दाभिनिविष्टचित्तः कश्चिद् दृष्टचरः श्रुतो वा॥ ननु श्रुता एव बहवः प्रियव्रतप्रभृतय इति चेत्, रे मूर्ख, तेषु भोगस्य नाममात्रम्। न हि ते विषयेष्वासक्तचित्ताः, किन्तु केवलं प्रभुचरणपरायणा एव। अतः प्रभोराज्ञया ते राज्यादिकं कृतवन्तो, न तु भोगं भुञ्जानाः॥ नन्वनुभवेन कथं निर्द्धारः प्रमाणसम्मतिं विनानुभवत्वप्रमात्वयोः सन्देहादिति चेत्, वत्स, विमला मतिस्ते, यतः प्रमाणसम्मतिमपि श्रोतुकामोसि। अवहितः शृणु। प्रथमं तावद्गीतासु श्रीमद्यदुकुलजलधिसमुद्भूतश्रीकृष्णचन्द्रोक्तमवधारय। तथाहि, 'विषयान्ध्यायतः पुंसः सङ्गस्तेषूपजायते। सङ्गात् सञ्जायते कामः कामात् क्रोधोभिजायते। क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः। स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति'। सङ्ग आसक्तिः, कामोभिलाषः, क्रोधः कोपः, सम्मोहो विवेकाभावः, स्मृतिविभ्रमो भगवच्चरणविस्मरणम्, बुद्धिनाशः सुबुद्धिनाशः, प्रणाशः स्वरूपलाभाभावः। मुक्तौ लीलाप्रवेशे वा स्वरूपलाभस्तदभावः संसारः। अत एव कपिलदेवैरप्युक्तं 'चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम्। गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तय' इति (भा.३-२५-१५)। गुणेषु रूपरसादिषु पञ्चस्वपि विषयेष्विति यावत्। अत एव "मन एव मनुष्याणां कारणं बन्धमोक्षयो"रित्यपि। अत एव "विषयाविष्टचित्तानां कृष्णावेशस्तु दूरत" इत्यपि। भोगेष्वपि स्त्रीसंभोगः सुतरां बाधकः, तत्क्षणमेव बुद्धिविपर्यासकरत्वात्। अत एव कपिलदेवैरपि 'न तथास्य भवेन्मोह' इत्याद्युक्तम्। 'भोगान्सन्त्यज्य यः सर्वान्" "न जातु काम" इत्यादि ययातिवचनम्। 'महत्सेवाद्वारमाहु'रित्यादि ऋषभवाक्यम्॥ ननु तर्हि 'बाध्यमानोपि मद्भक्त' (भा. ११-१४-१८) इत्यादिना विषयाणामबाधकत्वं कथमुच्यत इति चेद्, अत्र वदामः। केवलं भजनं कुर्वाणः कदाचिदिन्द्रियनिग्रहं कर्तुमशक्नुवन्विषयैः स्ववशः क्रियते तस्याशक्येर्थे भगवान् क्षमत इति। न तस्य तत्पापभोगो भवति। अत एव कृपयाहं तथा सम्पादयामीति ज्ञापयितुं स्वपक्षपातज्ञापकं 'मद्भक्त' इति पदमुक्तवान्। अत ए"वाजितेन्द्रिय" इति तस्याऽशक्तिं (दृष्ट्वा) दयायां हेतुमुक्तवान्। अजितेन्द्रिय इन्द्रियजयं कर्त्तुमशक्तः। ईश्वरः केनापि न नियन्तुं शक्य इति कदाचिदेतादृशेपि न क्षमां करोति तदा तेन पापेन सोभिभूयत एवेति प्राय इत्युक्तम्। प्रायो बाहुल्येन, न तु सर्वथा नियमः। भक्तिरपि प्रगल्भा चेदुत्कर्षं प्राप्ता भवति, नोचेन्न क्षमते। तेनैवं पदयोजना, इन्द्रियजयं कर्त्तुमशक्तः सन्विषयैर्वशो यो मद्भक्तः स विषयैः पराजितो न भवति परमया भक्त्या। तथा च अनेनापि भक्तिरुत्तरोत्तरमधिका कार्या, यावच्छक्यमिन्द्रियनिग्रहश्च कर्त्तव्य इति सूचितम्। यद्वा, पूर्वमजितेन्द्रियः सन् स विषयैर्बाध्यमानोपि, यदा तत्सर्वं परित्यज्य प्रगल्भभक्तिमान् भवति तदा नाभिभूयत इति। अथवा, प्रौढिप्रकारमेव

प्रभुराह ‘ बाध्यमानोपी’ति । तथाहि, प्रभुर्द्वेधाप्यङ्गीकरोति मर्यादया पुष्ट्या च । तत्र पुष्ट्या यमङ्गीकरोति स नाभिभूयते, प्रगल्भया पुष्टिमार्गीयया । एवमङ्गीकारे नियमाभावात्‘त्माय’ इति । यथा राजानोतिकृपापात्राय यत्किञ्चिदपि कार्यमकुर्वाणायापि सर्वस्वं ददति तस्य सहस्रमप्यपराधान्न मन्यन्ते, गालिदानेपि परिहासं मन्यन्ते, अन्यस्मै च कार्यमकुर्वाणाय किमपि न प्रयच्छन्ति, उच्चैर्भाषणेपि दण्डं न विदधति, स्वतन्त्रा यतः, तथा भगवानपि यस्मै अतीव कृपयति तस्मै निःसाधनायापि सर्वस्वं ददाति, तस्य सहस्रमपि दुराचारान्न मनुते । यत्र क्षुद्राः खण्डमण्डलाधिपतयोपि स्वैरचारिणो भवन्ति तत्र किं वाच्यं त्रिभुवनपरिवृढस्य पुरुषोत्तमस्य स्वच्छन्दाचरणे । यद्यपि प्रभुः कदाचित्साधनं नापेक्षतेपि, तथापि मर्यादा कदापि कस्यापि न हेया, किन्तु कार्यैव । सर्वेषां प्रभोरिच्छा दुर्ज्ञेया, यतः को वेद भगवान्कथं वा मनुते, कदाचित्प्रभुः लोकसङ्ग्रहार्थमपि कारयति, कदाचिदेवमपि । अतः करणे न बाधकमकरणे तु कदाचित्प्रभुकोपोपि सम्भावितः । तस्मात् “ पाक्षिकोपि दोषः परिहरणीय ” इति न्यायेन करणीयैव मर्यादा । यदि च मर्यादात्यागे प्रभोरिच्छां जानीयात्तदा त्यागेपि न क्षतिः । अत एव गुर्वादिहननं विदधानोपि पार्थो न दोषभाग् जातः । यदा च ज्ञानस्य भक्तेर्वा प्राचुर्येण देहाद्यनुसन्धानमेव निवर्त्तते तदा त्यागे न दोषः । अत एव ऋषभदेवजडभरतादीनां तथैवाचरणम् । यदा च भगवद्वार्त्तादिषु व्यसनं स्यात्तदा ज्ञात्वापि मर्यादात्यागे न दोषः । अत एव “तावत्कर्माणी”त्यादि । यदा च तत्त्वज्ञानमुत्पद्यते तदापि न दोषः । अत ए“वापि चेदसि पापेभ्य” इत्यादि । तस्माद्यावच्छक्यमिन्द्रियनिग्रहः कर्त्तव्य इति सिद्धम् । अत एव “सर्वेन्द्रियोपशान्त्या च” ॥

तत्र भगवदिच्छया यदा भविष्यति तदा भवत्वितिप्रकारकमालस्यं न कार्यं, किन्तु स्वयमुद्यम्येन्द्रियनिग्रहः कर्त्तव्य इति ज्ञापनाय स्वयमिति ।

बहुवचनेन सर्वेन्द्रियभोगस्त्याज्य इति सूचितम् । यद्वा, भोगानत्यजन्तमन्यं दृष्ट्वा कदाचित्कश्चिदालस्यं कुर्यात्तत्राहुः स्वयमिति । अन्यस्त्यजतु, मा वा, स्वयं तु त्यजेदित्यर्थः । न ह्यन्यत्रापकर्षं दृष्ट्वा स्वयमप्यपकृष्टेन भाव्यं, किन्त्वन्यत्रोत्कर्षं दृष्ट्वा स्वयमुत्कृष्टेन भाव्यम् । अत एव तैत्तिरीयोपनिषत्स्वाचार्येण शिष्यशिक्षणप्रकारे “ यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणी”त्युक्तम् । भोगस्य सामग्र्यां सत्यां धैर्यं दुष्करमिति पूर्वमेव सामग्रीमेव न सम्पादयेदिति ज्ञापनायेन्द्रियकार्याणीति ।

अन्यथा 'भोगांस्त्यजे'दित्येवोक्तं स्यात् । अत एव “मात्रा स्वस्रे”त्यादि । तेन समूलघातं भोगं हन्यादिति पर्यवसितोर्थः । अत एव शब्दादीन्विषयांस्त्यक्त्वेत्यादि । त्यागे प्रकारमाहुः कार्येति । कायेन वाचा मनसा चेत्यर्थः । द्वन्द्वसमासोयम् । “सर्वो हि द्वन्द्व”

इत्येकवद्भावः। यद्वा, "कायवाग्भ्यां सहितं यन्मन" इति मध्यमपदलोपी समासः। तेन कायवाचोर्गौणत्वं तृतीयया सूच्यते। तथा च मुख्यो मानस एव त्यागः। कायिको वाचनिकश्च गौणः। अत एव गीतासु "कर्मेन्द्रियाणि संयम्ये"त्यादि॥ नन्विदमखिलमशक्यमिव भाति, यतः कठिनतम इन्द्रियनिग्रहः। अत एव गीतासु "इन्द्रियाणि प्रमाथीनी"त्यादि। उपदेशश्चासम्मतः। न हि शास्त्रमपप्यशक्यमुपदिशति। अतः कथमुपदेश इति चेत्तत्राहुरशूरेणापीति। अशूर इन्द्रियजयं कर्त्तुमशक्तः। तादृशेनापि यथाशक्तीन्द्रियदमनं कर्त्तव्यम्। तत्र हेतुः स्वस्येति। भावनात्, विचारणात्। अयमभिसन्धिः। यदि जीवः स्वयं स्वदोषान्निराकर्त्तुं समर्थः स्यात्तदा मर्यादोल्लङ्घनेन जनितदोषान्निवार्य सुखी स्यात्, परन्तु स्वयमसमर्थोः न हीश्वरमर्यादां मनसाप्यन्यथा भावयितुं कोऽपीष्टे। अत ए'वेशस्य हि वशे लोक'इत्यादि। तथा च, विचारे क्रियमाणे निग्रह एवेन्द्रियाणां कार्यः। अत ए"वेन्द्रियाश्वविनिग्रह" इत्यादि विचारश्चावश्यकः। न हि विना विचारं कोऽपि कुत्रापि प्रवर्त्तते, "प्रयोजनमनुद्दिश्य मन्दोपि न प्रवर्त्तत" इति न्यायात्। कुतस्तरां च विवेकी। पदसम्बन्धस्तु, स्वस्यासामर्थ्यविचारणादशूरेणापीन्द्रियनियमनं कर्त्तव्यमिति ॥ ८ ॥

[व्र.] स्वयमित्युद्यम्य आग्रहेणेति यावत्। इन्द्रियकार्याणि ज्ञानक्रियाप्रधानान् भोगान् कायवाङ्मनसा कायवाग्भ्यां सहितं मनस्तेन सर्वात्मना त्यजेत्। क्रीडायामपि नाददीत, तेषामत्यन्तबाधकत्वादित्यर्थः। बाधकत्वं च "विषयान्ध्यायतः पुंस" इत्यादिना गीतायां स्फुटमेव। कायेन त्यागो भोग्यानुपादानम्। वाचा त्यागः शुभाशुभत्वाकीर्त्तनम्। मनसा त्यागस्तन्निःस्पृहत्वम्। न चैवमुद्यम्य त्यागे आग्रहापातेन विवेकहानिः प्रसज्येतेति शङ्कनीयम्, आग्रहस्योपभोग्यत्वाद्यंश एवोपक्षयेण विवेकभङ्गासमर्थत्वात्॥ ननु "स्वयं त्यजे"दित्यनेन यादृच्छिकस्यात्यागः प्राप्तः, उचितं चैतत्। अन्यथा शरीरयात्रानिर्वाहाभावेन साधनस्याप्यनुष्ठानाशक्तिप्रसङ्गात्। अत्यक्ते च यादृच्छिके तस्यापि विषयत्वेन बन्धस्वभावत्वादिन्द्रियाण्याकर्षणीयानि, तथा स"तीन्द्रियैर्विषयाऽऽकृष्टे"रिति प्रनाड्या सर्वनाशप्रसङ्गः। न च ततो रक्षार्थं स्वभावो विजेतुं शक्यः, आरम्भदशायां तादृक्सामर्थ्याभावात्, "स्वभावविजयः शौर्य"मिति वाक्येन तस्य शूरकार्यत्वात्। अतः कथं धैर्यरक्षेत्यतस्तत्रोपायमाहुरशूरेणापीत्यादि। स्वभावमिन्द्रियाणि च जेतुमसमर्थेनापि स्वस्यासामर्थ्यं भावयित्वा इन्द्रियकार्यत्यजनं कर्त्तव्यम्। किं करोमि, मन्दभाग्योऽहमसमर्थ एतावत्याज्ञा मया पालयितुं न शक्यते, इत्यादि भावनीयम्। एवं प्रयतमानस्य ग्लानाविन्द्रियाणां कौण्ठ्ये, विषयैरपि तथा अनाकर्षात् क्रमेण तत्सिद्धिरित्यर्थः ॥ ८ ॥

[दी.] कर्तव्यान्तरमाहुरशक्य इति।

[गो.] ननु स्वशक्यमपि पूर्वोक्तदुःखसहनमशक्यं, कुतस्तरां यत्र स्वस्य सामर्थ्यमेव नास्ति तत्सहनमिति किमर्थमशक्योपदेश इत्यत आहुरशक्य इति।

[गो. उ.] ननु निग्रहः सर्वथावश्यक इति सत्यं, परन्तु यदि कथमपि कर्तुं न शक्नोति तदा किं तस्य नाश एवाहोस्वित्कथञ्चिन्निस्तार इत्याशङ्कायामाहुरशक्य इति।

[व्र.] अत्राप्यशक्तौ पुनरन्यमुपायमाहुरशक्य इत्यादि।

## अशक्ये हरिरेवास्ति सर्वमाश्रयतो भवेत्।

[दी.] सर्वप्रकारेणाशक्येऽर्थे हरिरेवास्ति मम शरणमिति बुद्धिमाश्रित्य तिष्ठतः सर्वमैहिकं पारलौकिकं च भवेदित्यर्थः॥ ८½॥

[गो०] सेवायां प्रवृत्तस्य विवेकधैर्यादिस्थितौ चेदशक्तिर्भवेत्तदा हरिरेव शरणमस्ति नान्य इति मनसि भावनीयम्। विवेकधैर्यादिप्रयत्नकरणेपि चेदशक्तिस्तदा तदर्थं प्रभुशरणगमने दयया स एव सर्वं सम्पादयिष्यतीति भावः, यतः स हरिः सर्वदुःखहर्ता। तदेवाहुः सर्वमाश्रयत इति। आश्रये कृते सर्वं सेत्स्यति। अशक्यपि शक्यं भवेत्। विवेकोपि भविष्यति, धैर्यमपि भविष्यतीति भावः। यद्वा, तस्मिन्कृते सर्वं स्वशक्यं सर्वथा यदशक्यं च तत्सर्वं भवेदन्यथा तदभावे स्वशक्यमपि न भवेदित्यर्थः। किञ्च, प्रयत्नकरणेपि तदेव सिद्ध्येन्नान्यत्। निःसाधनत्वेन शरणागतौ तत्कृपया सर्वं युगपदेव सिद्ध्येदित्यपि ज्ञापितम्। अनेन सर्वसिद्ध्यर्थमाश्रय एव कर्त्तव्यो नान्यत् किञ्चिदिति निश्चितम्। एतदेवोक्तं कृष्णाश्रये 'विवेकधैर्यभक्त्यादिरहितस्ये'ति॥ ८½॥

[गो. उ.] अशक्येऽर्थे हरिरेवास्ति। रक्षक इति शेषः। तत्र हेतुः, सर्वमिति। आश्रयतः भगवदाश्रयं कुर्वतः पुरुषस्य सर्वं भवेत्। आश्रयत इति पञ्चमी वा। इदमत्राकूतम्, यदि सर्वथाऽशक्यं ज्ञात्वा केवलं भगवच्छरणमेव भावयति तदा दयया भगवानेव तस्य सर्वं साधयति, अतो भगवदाश्रयात् सर्वसिद्धिः। अत एव "किरातहूणे"त्यादि। अतो न तस्य नाशः। अत एव "कौन्तेय प्रतिजानीही"त्यादि। सर्वदुःखहर्त्ता हरिः। तेन दीने परमदयालुरित्यवश्यं कार्यं साधयत्येवेति ज्ञापनाय हरिपदम्। एवकारेणान्यव्यवच्छेदः। न ह्यन्यः सर्वेषां सर्वदुःखानि निवार्य सर्वानन्दं दातुं शक्तः। एवं सर्वथाऽशक्ये रक्षकत्वेन भगवद्भावनमपि गौणः पक्षः। मुख्यपक्षे तु भगवान् किमपि करोतु, स्वेन तद्भावनमपि न कर्त्तव्यम्। न ह्येतावानपि सङ्कोचः प्रभौ दातुमुचित इति ज्ञापनाय रक्षक इति। विधेयपदस्याप्रयोग एव, किन्त्वध्याहारः। "ब्रह्मवर्चसकाम"स्त्वित्यादिवाक्यात्प्रतिनियतकार्यसाधका अन्ये, भगवांस्तु सर्वं साधयति, "अकामः सर्वकामो वे"ति वाक्यात्। तदाहुः सर्वमिति। अत एव "किमलभ्य"मित्यादि। आश्रयत इत्यासमन्तात् श्रयतः सेवां कुर्वतः "श्रिञ्सेवायां," सेवा च

चित्तस्य तदेकपरता, "चेतस्तत्प्रवण"मिति लक्षणात्। तदनुकूला च या काचन कृतिः, सा सर्वापि सेवैव। अत एव "मानसी सा परा मते"ति। तादृश्येव च कृतिः सन्तोषजनिका, सेवा च सन्तोषजनिकैव, "यद्वचे"ति वाक्यात्। लोकेपि तात्पर्यपूर्विकैव कृतिः सन्तोषजनिका। तथा च, स्वज्ञानानुसारेण प्रभुसन्तोषजनिकां ज्ञात्वा निरन्तरं कृतिः कार्येति सिद्धम्। शतृप्रत्ययेनाश्रयत्यागे किमपि न सिद्ध्यतीत्यप्यसूचि। अत एव "पतन्त्यधोऽनादृत युष्मदङ्घ्रय" इत्यादि। अशक्य इति पदाच्छक्यत्वेऽवश्यमिन्द्रियनिग्रह कर्त्तव्य इति सूचितम्। शक्तौ सत्यां मर्यादोल्लङ्घने प्रभुरपि क्रुद्ध्यति। अशक्यत्वे दयाविष्टः सन्सर्वमेव साधयतीति निगर्वः। अत एव "सकलदुःखदूरीकरणज्ञापितपरमदयालुत्वज्ञापकं हरिपदं प्रयुक्तवन्तः। अत एव "समस्तदुःखात्ययमाशु धत्त" इत्यादि ॥ ८½ ॥

[व्र.] एवमप्यशक्ये हरिरेवास्ति शरणमिति शेषः॥ नन्वेवं शरणोपदेशेन कथं तत्सिद्धिरित्याकाङ्क्षायामाहुः सर्वमाश्रयतो भवेदिति। "सर्वधर्मान्परित्यज्ये"ति शरणोपदेशवाक्ये स्वस्यैव पापमोचकत्वकथनेन शोकनिवारणेन च आश्रयादेव सिद्धिबोधनात्तथेत्यर्थः॥ ८½ ॥

[दी.] उपसंहरन्ति–एतदिति।

[गो.] एवं धैर्यलक्षणमुक्त्वोपसंहरन्ति एतदिति।

[गो. उ.] ननूपक्रमे त्रिदुःखसहनं धैर्यमित्युक्तम्, उपसंहारे च विषयभोगरूपसुखस्य त्याग उक्तस्तथा चोपक्रमोपसंहारविरोध इत्याशङ्क्य निराकुर्वन्त उपसंहरन्त्येतदिति।

[व्र.] एवं धैर्यं सपरिकरं निरूप्योपसंहरन्तोऽग्रिमनिरूपणस्य गतार्थत्वमपि वारयन्ति एतदित्यादि।

## एतत्सहनमत्रोक्तमाश्रयोऽतो निरूप्यते ॥ ९ ॥

[दी.] क्रमप्राप्तमाश्रयं निरूपयन्ति-आश्रयोऽत इति। अत इति धैर्यनिरूपणानन्तरमित्यर्थः॥ ९ ॥

[गो.] अत्र भक्तिमार्गे पूर्वोक्तप्रकारेणोक्तं सहनस्वरूपमेतत्। अतःपरमाश्रयो निरूप्यते। नितरां विशेषेण रूप्यते स्वरूपतः कथ्यत इत्यर्थः। यद्वा, यत एतद्विवेकादिकं सर्वमाश्रयं विना अशक्यमत आश्रयो निरूप्यते ॥ ९ ॥

[गो. उ.] अत्र धैर्यप्रकरणे एत'त्रिदुःखसहनमि'त्यारभ्य यन्निरूपितं तत्सर्वं सहनमेवोक्तमित्यर्थः। न हि दुःखमसोढ्वा भोगत्यागः कर्त्तुं शक्यते, तेन भोगत्यागेनापि पर्यवसन्नं दुःखसहनमेवोक्तमिति नोपक्रमोपसंहारविरोधः॥ नन्विदं न सङ्गच्छते। तथा हि, भवद्भिः

सहनमेव धैर्यमुच्यते, तच्चासङ्गतं, वचनविरोधात्, वचनेषु सर्वत्रोभयोर्भेदात्। तानि च "तेजो बल"मित्यादीनि। अत एव श्रीमदुद्धवैः पृथक् पृष्टं, श्रीमद्यदुवंशजलधिरत्नेनापि तथैवोत्तरितम्। तस्मादुभयोरैक्यं कथं घटत इति चेद्, अत्र वदामः। अन्यत्र यथातथास्तु, अत्रास्मिन्ग्रन्थे एतद्धैर्यमेव सहनमुक्तं, न तु भिन्नमिति पदसम्बन्धः। वस्तुतस्तु द्वयोरैक्यमेव। उक्तप्रश्नोत्तरयोर्भिन्नतया कथनं तु अवस्थाभेदमाश्रित्य, न तु क्षमाधृत्योर्भेदः। अत एवोत्तरे 'तितिक्षा दुःखसम्मर्ष' इति सामान्यतः सहनमुक्तम्। 'जिह्वोपस्थजयो धृति'रिति विशेषतः। न हि जिह्वोपस्थयोर्जयस्तदुभयसम्बन्धिदुःखसहनादन्योऽस्ति। ये हि तदुभयजयनिमित्तं यतन्ते ते तयोर्निग्रहे क्रियमाणे जिह्वाविषस्य सुस्वाद्वन्नादेरुपस्थविषयस्य स्त्र्यादेरलाभेन यद् दुःखमापद्यते तत्कीदृशमपि कठिनं सहन्ते, नत्वन्यत् किञ्चित्कुर्वन्ति। यथा यथा चाभ्यासस्तथा तथाऽनायासेन सहन्ते। अत एव गीतासु क्षात्रस्वाभाविककर्मसु "शौर्यं तेजो धृतिर्दाक्ष्य"मिति धैर्यं गणितम्। न हि जिह्वोपस्थयोर्जयः क्षत्रियाणां सहजो धर्मः, किन्तु, दुःखसहनमात्रम्। अत एव गीतासु "धृतिं न विन्दामि" "धृत्या यया"। उद्देशक्रमानुसारेणाश्रयमाहुराश्रयोऽत इति। अत इति ल्यब्लोपे पञ्चमी। अत इदं द्वयं निरूप्येत्यर्थः। तेनैवं पदसम्बन्धः। अतः विवेकधैर्ये निरूप्य तदनन्तरमाश्रयो भगवदेकशरणत्वं नितरां विविच्य रूप्यते कथ्यत इति। तथा चातः परमाश्रयो निरूप्यत इत्यर्थः। यद्वा, हेतौ पञ्चमी। अत आभ्यां विवेकधैर्याभ्यां हेतुभ्यामाश्रयो निरूप्यत इत्यर्थः। यद्यपि भगवदनुग्रहं विना नाश्रयः सम्भवति, तथापि यदा साधनद्वाराङ्गीकरोति तदा विवेकधैर्ये अपि साधने। अत इति सहार्थे तृतीया। सार्वविभक्तिकस्तसिल्। तथा च, विवेकधैर्याभ्यां सहाश्रयो निरूप्यत इत्यर्थः। तृतीयया विवेकधैर्ययोरप्राधान्यं प्राधान्यं चाश्रयस्यैवेति निरूप्यते। अथवा, एतद् विवेकसहितं सहनं धैर्यमत्रास्मिन्ग्रन्थे उक्तं कथितम्। अतो हेतोराश्रयो निरूप्यते। अयमभिसन्धिः। आश्रयनिरूपणार्थमङ्गत्वेन विवेकधैर्ये उक्तं, तेन यद्याश्रयो न निरूप्यते तदा विवेकधैर्यनिरूपणं व्यर्थं स्यात्। तथा चैवं पदसम्बन्धः। यतः कारणादाश्रयनिरूपणार्थमङ्गत्वेन विवेकधैर्ये उक्ते, अतो हेतोर्विवेकधैर्ययोर्निरूपणस्य सार्थकत्वाय विवेकधैर्यनिरूपणानन्तरमाश्रयो निरूप्यत इति। बुद्धिस्थवाचकत्वात्सर्वनाम्नां पूर्वं च विवेकसहितमेव धैर्यमुक्तमिति विवेकसहितमेवैतत्पदेनोच्यते। यद्वा, एतद्विवेकसहितं सहनं धैर्यम् अत्राश्रये उक्तमभिहितमतो हेतोस्तदुभयनिरूपणानन्तरं यत्रेदं द्वयं निरूपितं स आश्रयो निरूप्यत इति। तथाहि, अत्र हि भगवदाश्रये क्रियमाणे यादृशे विवेकधैर्ये अपेक्षिते तादृशे निरूपिते, स आश्रयस्तदुभयनिरूपणानन्तरं निरूप्यत इति। आश्रयः आसमन्तात् श्रयः सेवनम्, श्रिञ्सेवायाम्, अस्मात् घञ्। सेवा च चित्तस्य तदेकपरत्वम्, अत एव "चेतस्तत्प्रवणं सेवे"ति लक्षणमुक्तमाचार्यैः। यद्यपि, मनोवाग्देहैः सेवा त्रिविधा, तथापि

मुख्या मनोव्यसनरूपस्नेहात्मिका। अन्या तु सेवा तत्साधनरूपा। अत एव "चेतस्तत्प्रवणं सेवे"तिलक्षणमुक्त्वा "तत्सिद्ध्यै तनुवित्तजे"ति सेवान्तरस्य तत्साधनत्वमुक्तम्। मनोवचनरूपायास्तु "मानसी सा परा मते"ति मुख्यत्वमुक्तम्। इयमेव भक्तिरित्युच्यते, शाण्डिल्यसूत्रे "सा परानुरक्तिरीश्वरे" इति लक्षणात्। अत एव नारदपञ्चरात्रे "स्नेहो भक्तिरीति प्रोक्त" इति लक्षणमुक्तम्। तत्र माहात्म्यज्ञानपूर्वकं तु अपराधनिवृत्त्यर्थम्, न तु लक्षणे प्रविष्टम्। श्रवणादिलक्षणा तु भक्तिस्तस्याः साधनरूपा, अत एव 'भक्त्या सञ्जातया भक्त्ये'ति। अतः सेवामार्गो भक्तिमार्गश्चैक एव ॥९॥

[व्र.] अत्र शरणमार्गे एतदुक्तसाधनकथनान्तं धैर्यमुक्तम्। तथा च "अशक्य"इत्यादिना यदाश्रयणमुक्तं तदपि धैर्यरक्षणशेषत्वाद् धैर्यान्तःपात्येव, न त्वाश्रयरूपमित्यर्थः। अतः परं क्रमप्राप्तं प्रधानमाश्रयं निरूपयन्ति आश्रयोतो निरूप्यत इति। अतः तावता चारितार्थ्याभावादावश्यकत्वाच्च आश्रयो निरूप्यत इत्यर्थः। आश्रयशब्द आधारे योगरूढः, सेवने यौगिकः, आसमन्तात् श्रयणं सेवनमाश्रय इति ॥ ९ ॥

[दी.] आदौ फलितं रूपमाहुः ऐहिकेति।

[गो.] यस्मिन्कृते सर्वं भवतीति प्रथमं समुदायेनाश्रयस्वरूपमाहुरैहिक इति।

[गो. उ.] प्रतिज्ञातमाश्रयं पद्यचतुष्टयेन लक्षयन्ति ऐहिक इत्यादिना।

[व्र.] तत्र प्रकृते किं विवक्षितमित्याकाङ्क्षायां तस्य स्वरूपमाहुरैहिक इति।

ऐहिके पारलोके च सर्वथा शरणं हरिः।
दुःखहानौ तथा पापे भये कामाद्यपूरणे ॥ १० ॥
भक्तद्रोहे भक्त्यभावे भक्तैश्चातिक्रमे कृते।
अशक्ये वा सुशक्ये वा सर्वथा शरणं हरिः ॥ ११ ॥
अहङ्कारकृते चैव पोष्यपोषणरक्षणे।
पोष्यातिक्रमणे चैव तथान्तेवास्यतिक्रमे ॥ १२ ॥
अलौकिकमनःसिद्धौ सर्वार्थे शरणं हरिः।
एवं चित्ते सदा भाव्यं वाचा च परिकीर्तयेत् ॥ १३ ॥

[दी.] इहास्मिन् जन्मनि तदुपलक्षिते काले वा भवदैहिककार्यमुच्यते। परोऽस्मादन्यः, अन्तरिक्षलोकमारभ्य ब्रह्मलोकपर्यन्तः। चकाराद्भगवदिच्छया कदाचिन्नरकभोगः सम्भाव्यते चेत्तत्रापि सर्वप्रकारेण कायेन वाचा मनसा च हरिरेव शरणं ममेति चित्ते निश्चित्य स्थेय-

मित्यर्थः। भगवदीयानां नरकः स्वर्गादिरेव, न तु तामिस्रादिः। अत एव **विष्णुपुराणेऽप्युक्तं** "वासुदेवे मनो यस्य जपहोमार्चनादिषु। तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम्॥" सामान्यतः सर्वकार्येषु शरणगमनमुक्तम्, इदानीं तदेव पुनर्निमित्तविशेषेष्वप्युच्यते। तानि निमित्तानि '**दुःखहानौ**' इत्यारभ्य '**सर्वथा शरणं हरि**'रित्येतत्पर्यन्तोक्तानि ज्ञेयानि। दुःखस्य हानौ प्राप्तायामपि हर्षवशेन शरणविस्मरणं न कार्यमित्यर्थः। एवं सर्वत्र योज्यम्। **पापे** प्रारब्धवशाज्जाते, **भये** शत्र्वादिकृते, **काम** इच्छा लौकिकालौकिकसाधारणी, **आदि**-पदेन धर्मादिरपि, तेषामपूरणेऽनिष्पत्तौ भक्तेषु द्रोहे जातेपि, अन्यत्र भक्तिं दृष्ट्वा स्वस्य भक्तिराहित्येन स्पृहामात्रेपि **भक्तैः स्वस्यातिक्रमे** कृतेपि तेषु प्रातिकूल्यं न कार्यमिति भावः। **अशक्ये** स्वयमन्यद्द्वारा वा कर्तुमयोग्येऽर्थे, **सुशक्ये**ऽनायासेन कर्तुं योग्येऽर्थे, उभयत्रापि **वा**शब्दोऽप्यर्थे। **अहङ्कारेण कृते**ऽहङ्कारकृते, **पोषणं रक्षणं पोषणरक्षणे**। **पोष्याणां** पोष्यवर्गाणां पोषणरक्षणे अहङ्कारेण कृतेऽपि। **चकारः** सर्वत्र समुच्चयार्थः। पोष्यवर्गस्य दैववशादतिक्रमे सति। **अन्तेवासी** भगवन्मार्गजिज्ञासुः शिष्यः। **सर्वार्थे** सर्वस्मिन्नुक्तरूपेऽर्थेपि हरिरेवाश्रयणीय इत्यर्थः॥

**अलौकिकमनःसिद्धाविति** निमित्तसप्तमी। तेनालौकिकमनःसिद्ध्यर्थमेव **सर्वार्थे हरिरेवाश्रय** इत्यर्थः पर्यवसितः। **एवमिति**। विवेकादीनां स्वरूपं यादृशमुक्तं तादृशं **सदा चित्ते सम्यगनुसन्धयेम्**। **वाचा च** वचनेनापि परबोधनार्थं स्वार्थमेव वा **परिकीर्त्तयेत्** परितः सर्वतः कीर्त्तयेत्। **चकारात्** कायव्यापारयोग्यं कुर्यादपि॥ १०, ११, १२, १३॥

[गो.] भक्तिमार्गाङ्गीकृतस्य सेवायां प्रवृत्तस्य प्रभुसेवाव्यतिरिक्तकर्मकरणस्यास्वधर्मत्वेनैवैहिकपारलौकिकसाधनकरणाभावात् सेवायामप्यन्तरायबाहुल्येन तथात्वाभावाच्च तदुभयमपि कथं सेत्स्यतीति तत्सिद्ध्यर्थं शरणमेव सर्वात्मना भावनीयं, न तु सेवां विहाय किञ्चित्साधनान्तरं कार्यम्। शरणगतौ प्रभुः स्वयमेव सम्पादयिष्यति। यतो हरिः सर्वदुःखहर्त्ता स्वकीयानां निरुपधिभगवत्सम्बन्ध्यपेक्षिताभावजनितदुःखं हरिष्यत्येवेति भावः॥

एवं समुदायेनाश्रयमुक्त्वा तत्रापि प्रत्येकभेदेन विशेषत आश्रयस्वरूपमाहुर्दुःखहानाविति। भक्तिमार्गीयस्य सेवायां प्रवृत्तस्य पूर्वोक्तदेहेन्द्रियादिसम्बन्ध्याधिभौतिकादिदुःखहानौ धैर्येण तत्कृतचित्तोद्वेगाद्यभावार्थं शरणमेव भावनीयं, तेनैव सर्वं सेत्स्यतीति प्रत्येकं तत्तत्कार्ये भावनीयमित्यर्थः। **तथा पापे** पापनिवारणे पूर्वसामयिके प्रमादाज्जायमाने च, सेवायां भगवद्विषयके देहेन्द्रियादिभगवदपराधादिरूपे च। तदेवोक्त"महं त्वां सर्वपापेभ्य" इति। न तु तदर्थं प्रायश्चित्तादिकं कर्त्तव्यं, तत्करणे शरणधर्मो गच्छेदित्यर्थः। तथा **भये** राजचौरादिजनिते, पापादिविषये प्रभ्वपराधविषये च आधिभौतिकादित्रयं सर्वत्र ज्ञेयम्। **कामार्थ**-

पूरणे इति । कामानामभिलाषाणां येऽर्थाः पदार्थाः, ऐहिका भगवत्सम्बन्धिनश्च । तत्राप्यैहिकं द्विविधं, दैहिकमैन्द्रियकं च, तत्पूरणे च । तत्रापि विशेषमाहुर्भक्तद्रोह इति । प्रमादतो जीवस्वभाववशाद्भक्तस्य द्रोहो जातश्चेत् सोपराधः केनापि दूरीकर्तुं न शक्यते मर्यादायामपि, किं पुनः पुष्टिमार्गे । यथा दुर्वाससोम्बरीषविषये तथास्यापि । तथा सम्भवे शरणमेव भावनीयं, न त्वन्यत् । भक्त्यभावे सेवायां प्रवृत्तस्यापि स्वरूपे स्नेहो न जायते, तदर्थं भक्तैश्च स्वस्यातिक्रमे कृते सति । न हि भगवदीयानामयं स्वभावो यन्निमित्तं विना यस्य कस्याप्यतिक्रमं कुर्वन्ति । तत्करणे तु स्वदोषमेव विचार्य शरणं भावनीयं तद्दोषनिवृत्त्यर्थम् । किञ्च, अशक्ये वेति । स्वस्य कर्तुमशक्ये कार्ये शरणं भावनीयम् । अशक्य इत्युक्ते शक्यत्वे स्वयमेव कार्यमिति न ज्ञेयं, तत्राहुः सुशक्य इति । सर्वथा शरणं हरिः । स्वस्य सुतरां शक्यमपि, तथापि शरणमेव भावनीयं, प्रभुशरणेनैवेदं सिद्धं, नान्यथेति । प्रभोर्विघातकरणे स्वस्य सामर्थ्याभावात्स्वकृतेनाभिमानाच्छरणधर्मोपि गच्छेदिति सर्वात्मना तदीयत्वानुसन्धानेन शरणमेव भावनीयम् । यतः प्रभुः हरिः सर्वदुःखहर्त्ता अशक्यादिदुःखं हरिष्यत्येवेत्यर्थः । अथवा, अशक्ये भगवत्सम्बन्धिनि साधनासाध्ये, सुशक्ये साधनसाध्ये लौकिकेपि तदेव भावनीयं, न तु स्वप्रयत्नः कर्त्तव्यः, तत्करणे शरणधर्मो नश्येदिति ॥

किञ्च, अहङ्कारकृते चैव जीवस्वभाववशात्केनापि उदासीनेन भक्तेन च सहाहङ्कारः कृतस्तदा तेनासुरावेशो भवत्येवेति, पश्चाद्विवेके जाते पश्चात्तापो जायते मयाऽसमीचीनं कृतमिति, तद्दोषपरिहारार्थं शरणमेव भावनीयम् । यद्वा, प्रभुकृपाभरेण मौढ्या प्रभुणा सहैवाहङ्कारः कृतस्तदापि दोषपरिहारार्थं तदेव भावनीयम् । किञ्च, पोष्याणां पोषणं रक्षणं च, तत्करणेपि तदेव भावनीयं, न तु प्रयत्नः कार्यः । पोष्यातिक्रमणे चैव । पोष्यादीनां भार्यादीनां, चकारादन्येषां बन्धुदासपर्यन्तानामप्यतिक्रमे, तथान्तेवासी स्वशिष्यस्तत्कृतेप्यतिक्रमे शरणमेव भावनीयं, न तु क्रोधादिकम्, तत्करणे आसुरावेशसम्भवात् । किञ्च, तदुपरि स्वस्य क्रोधकरणे शिष्यस्यानिष्टं भवेद् इति सुकृतीनां नायं स्वभावो यदङ्गीकृतं त्यजन्तीति । तस्य दण्डादिकं प्रभुरेव करिष्यतीति तत्राभिमानेन न स्वधर्महानिः कार्येति भावः ॥

ननु प्राकृतानां चित्तादीनामध्यासनिवृत्तिरतिकठिना, तदभावे सर्वमेव कठिनमिति चेत्तत्राहुरलौकिकेति । मन इत्युपलक्षणम् । किन्तु सर्वेषां देहेन्द्रियादीनां प्राकृतांशनिवृत्त्या यथा अलौकिकत्वं भवति तत्सिद्धौ तदनन्तरं सर्वार्थेऽलौकिकसकलपदार्थसम्पत्त्यर्थमपि हरिरेव शरणं भावनीयो नान्यत् । तदेवाहुरेवमिति । एवंप्रकारेण चित्ते ज्ञानरूपे, न तु जडे, सदा निरन्तरं भावना कार्या । अथ च वाचापि परितः कीर्त्तयेन्निरन्तरं मुखेन कथयेदित्यर्थः । क्षणमात्राकथने तदैवासुरभावप्रवेशः स्यादित्युक्तं सदेति । चित्तस्य ज्ञानरूपत्वाभावेपि कीर्त्तनमस्यावश्यकमिति कीर्त्तनमुक्तम् । एतदेवोक्तं नवरत्ने 'तस्मात्स-

र्वात्मने'त्यत्रा'न्तःकरणे तथाभावेऽतथाभावे वा वन्दनमावश्यक'मिति । यद्वा, चकारात् कायेन सेवापि कर्त्तव्या, मनसा भावना, वाचा कीर्तनमिति त्रिविधापि प्रपत्तिर्निरूपिता । एवं सति सर्वमेव पूर्वोक्तं शक्यं भविष्यतीति भावः ॥ १०, ११, १२, १३ ॥

[गो. उ.] **एवं चित्त** इत्यनेनान्वयः। "मुख्यो मानस" इति पूर्वमानसोक्तिः। तत्र सङ्क्षेपत आश्रयस्वरूपमर्द्धेन पद्येनाहुरै**हिक** इति। ऐहिके इह लोकसम्बन्धिनि, **परलोके** परलोकसम्बन्धिनि कार्यमात्रे **सर्वथा** सर्वैः प्रकारैः **हरिः** श्रीकृष्णः **शरणं** रक्षकोस्तु। **एवं चित्ते सदा भाव्य**मित्यग्रिमेणान्वयः। रक्षणं चात्र हितकारित्वं, न तु प्राणरक्षकत्वमात्रम्। लोकेपि महाशास्त्र्युपस्थितौ धनादिमोषे वा उपस्थिते तस्मान्निवारणे कृते अनेनायं रक्षित इति प्रयोगः। तेनैहिकपारलौकिकयोरर्थयोः सर्वैः प्रकारैस्त्वमेवास्मद्धितकारी भवेति प्रार्थना। जीवाः प्रायेण स्वस्य हितमपि न विदन्ति। हितज्ञानेऽपि प्रबलेषु स्वदोषेषु विद्यमानेषु प्रबलैः प्रत्यूहैः कृत्वा स्वहितं कर्त्तुं न शक्नुवन्ति। तस्मात्त्वमेव सर्वान्दोषान्निवार्य हितं साधयेति भावः कटाक्षितः। केचनैतादृशा ये किमपि न प्रार्थयन्ते, उत्तमाश्च त एवेत्यपि ज्ञापयितुमस्त्विति प्रार्थनार्थकक्रियापदस्याप्रयोगः॥ नन्वेतादृशाः के सन्ति, येषामैहिकं च किमपि न प्रार्थनीयमस्ति। न हि परमविरक्ता अपि पारमार्थिकाद्विरज्यन्त इति चेद्, अत्र वदामः। येषां प्रभुचरणारविन्दे व्यसनमस्ति ते मुक्त्यादिकमपि नेच्छन्तीति पारमार्थिकमपि न प्रार्थयन्ते। अत एव "न नाकपृष्ठं" "नैकात्मता"मित्यादिवचनानि॥ ननु ये मुक्तिं न वाञ्छन्ति तेपि प्रभुचरणारविन्दानुरागरूपां भक्तिं वाञ्छन्त्येव, न हि भगवदीयाः। ततोपि निरपेक्षा भवन्ति। अतः सा भक्तिरेव पारमार्थिकी प्रार्थनीयास्तीति प्रार्थनानिरपेक्षाः सर्वदुर्लभा इति चेत्, सत्यम्, दुर्लभा एव, न त्वलभ्याः। तथाहि, ये चरणारविन्दे व्यसनिनस्ते ततोपि निरपेक्षाः। यदि तावदप्यपेक्षितं स्यात्तदा तद्व्यसनमेव न स्यात्। व्यसनं हि तदेव यत्र तद्विना स्थातुमेव न शक्नोति। इदमेव (व्यसनं) तत्र प्रवृत्तिनिमित्तं, न त्वन्यत् किञ्चित्। अत एव लौकिकेपि द्यूतादौ ये व्यसनिनस्ते स्थातुमशक्ता एव तत्र प्रवर्त्तन्ते, न त्वन्यन्निमित्तमस्ति॥ ननु धनाशैव निमित्तमस्तीति चेत्, रे हृदयशून्य! यदि धनाशैव निमित्तं स्यात् तदा मुहुर्मुहुः पराजिता अपि कथं प्रवर्तेरन्। सन्देहादेव प्रवर्तन्त इति चेद्, ज्योतिर्विद्भिः समूलघातं सन्देहे हतेपि प्रवर्त्तन्त एव। न ह्युपायसहस्रेणापि तत्तद्व्यसनिनः कथमपि तेभ्यो निवर्त्तन्ते क्वचित्। किञ्च, इदमपि द्यूते आशङ्कितं स्यात्, व्यसनान्तरेषु का गतिः। न हि पापर्द्धिपरायणा मैरेयमत्ताः परदाररताश्च धनाशया प्रवर्त्तन्ते, प्रत्युत शम्भलीभुक्तसर्वस्वास्ते। तस्माच्चरणारविन्दव्यसनिनो निमित्तनिरपेक्षा एव। अत एव कपिलदेवेनापि "अनिमित्ता भागवती"ति फलभक्तिलक्षणमुक्तम्। यदि किमपि निमित्तं तत्र विद्यते तदा अनिमित्तत्वं कथं वदेत्। अग्रे च "अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तम" इत्युक्तम्।

"कुर्वन्त्यहैतुकी"मिति । अत एव कौण्डिन्यप्रभृतयस्तथाभूताः । अत एव व्रजवासिनामपि तथा भावः ॥ ननु यदि व्यसनिनः किमपि न प्रार्थयन्ते, सर्वनिरपेक्षत्वात् तदा व्रजवासिनः कथं प्रार्थितवन्तः । न हि तदपेक्षयाप्यन्ये व्यसनिनः सन्ति, "क्षणं युगशतमिवे"त्यादि वाक्यात् । प्रार्थ्यते च तैरनारतमेव ॥ ननु कैरुक्तं तैः प्रार्थ्यत इति । शुकादिभिरेव । कुत्र । श्रीभागवतादावेव । तथाहि, ॥ १२ ॥ "राम ! राम !" ॥१६॥ "कृष्ण ! कृष्ण !" ॥२०॥ "राम ! राम !" ॥ "कृष्ण ! कृष्ण !" ॥ २६ ॥ "मैवं विभो" ॥ ४४ ॥ "मनसो वृत्तयः" ॥७९॥ "आहुश्च ते" इत्यादिषु तत्कर्तृकप्रार्थना श्रूयते । न च तत्र प्रार्थनं किन्तु कथनमात्रमिति वाच्यम्, "इति विज्ञापितो गोपै"रित्यादिशुकोक्तिव्याकोपात् । विज्ञापनं प्रार्थनमेव । अपि च अन्ये तु मुक्त्यादिनिमित्तं प्रार्थयन्ते, न त्वैहिकनिमित्तम् । एते तु क्षुधादिनिवृत्त्यर्थमपि प्रभुं प्रार्थयन्ते । अल्पतमे क्षुन्निवृत्त्यादावपि यदि प्रभुं प्रार्थयन्ते तदा किमु वाच्यं महति कार्ये । यत्र निरुपमनिरुपधिनिरवधिस्निग्धा व्रजवासिनोऽजस्रमर्थयन्ते तत्रान्यः को वा सनाथः स्वनाथं न नाथेत् । तस्मादपार्थः प्रार्थनारहितान्वेषणप्रयास इति चेद्, अत्रोच्यते । प्रथमं तावत्प्रार्थनास्वरूपं विचारय, प्रार्थना नाम कः पदार्थः ॥ ननु ममेदमपेक्षितमित्यपेक्षितकथनं प्रार्थनेति चेत् , न, राज्ञः सेवकं प्रत्येवं वचनमपि प्रार्थना स्यात् । न हि सा प्रार्थना, किन्त्वाज्ञा । तथा मित्रं प्रति अन्यं कञ्चिदुदासीनं प्रति तादृग्वचनमपि प्रार्थना स्यात् । न हि सा प्रार्थना, किन्तु कथनमात्रम् ॥ ननु तस्य प्रार्थनात्वे किं बाधकमिति चेत्, प्रयोगाभाव एव । न हि तत्र राज्ञा मित्रेण वा इदं प्रार्थ्यत इति कश्चित्प्रयुङ्क्ते ॥ ननु लाभहेतुकं वचनं प्रार्थनेति चेत्, न, प्रार्थनानन्तरं लाभे तद्वचनस्य प्रार्थनात्वं न स्यात् , लाभरूपकार्याभावेन पूर्ववर्त्तित्वादिरूपकारणत्वाभावात् । न च सा न प्रार्थनेति वाच्यम् , प्रार्थितमनेन न दत्तमिति प्रयोगात् ॥ ननु लाभेच्छया वचनं प्रार्थनेति चेत्, न प्रजाभ्यो धनं गृह्यतामिति राजाज्ञाया अपि प्रार्थनात्वप्रसङ्गात्, करादिसञ्ज्ञया प्रार्थने अव्याप्तेश्च । न च तत्प्रार्थनमेव न भवतीति वाच्यम्, हस्तेनायं याचत इति प्रयोगात्, गृहीतमौनव्रतस्य भोजनादावपि तथात्वात् । स्यादेतत् । न वयं वचनपर्यन्तं वदामः, किन्तु लाभेच्छया यत्क्रियते तत्सर्वं प्रार्थनेति । तस्माल्लाभार्थमुद्यमः प्रार्थनेति चेत्, मैवम् । एवमत्राप्यव्याप्तिव्यावर्त्तनेपि राजाज्ञायामतिव्याप्तिर्वज्रलेपायितैव ॥ ननु दयोत्पादकं वचः प्रार्थनेति चेत्, मैवम्, शृण्वतां दयोत्पादकं "दुष्टमेनमाशु मारये"ति महादारुणवचसोपि याच्ञात्वप्रसङ्गात् ॥ ननु सम्बोध्यस्य दयोत्पादकं वचः प्रार्थनेति चेत्, न, आज्ञप्तस्य दयालुत्वे उक्तवचनेऽतिव्याप्तेः निर्दयं प्रति प्रार्थने व्याप्तेश्च, अश्रवणे चाव्याप्तेः । न चेदं द्वयमपि न याच्ञेति वाच्यम् , निर्दयोयमेतत्प्रार्थनां न मनुते, व्यग्रोयमेतत्प्रार्थनां न शृणोतीति च प्रयोगात्, किञ्च, "अयं देवदत्तो भृशमक्लेशी"दिति प्रासङ्गिकोक्तावप्यतिव्याप्तेः । अथ स्वस्मिन्सम्बोध्य दयोत्पादकं वचस्तथेति चेत् ,न, "सखे

भृशमहमक्लेशिष''मितिवृत्तवृत्तान्तवचनेऽतिव्याप्तेः। न हि सुहृत्क्लेशश्रवणेपि नानुकम्पते मनः। अथ दयार्थमुक्तिः प्रार्थनेति चेत् किं स्वस्मिन्दयार्थमाहोस्वित्परस्मिन्नुत सामान्यतः। न प्रथमः, परार्थं प्रार्थनेऽव्याप्तेः। न द्वितीयः, स्वार्थं प्रार्थनेऽव्याप्तेः। न तृतीयः, "निर्दयमेनं सदयं कुर्वि''त्युक्तेन देवदत्तेन पूर्वराजकथादिभिः कृते क्रूरराजप्रबोधनेऽतिव्याप्तेः। न च या च नैव सेति वाच्यम्, राजानमयं पुराणादिभिः प्रबोधयतीतिवद्याचत इत्यपि प्रयोगापत्तेः। तस्मात् मीमांसितव्यमेवैतदिति चेत्, न, धात्वर्थविचारेण याचनैव प्रार्थना, न च राजादिवचनादावतिप्रसङ्गः, तत्रापकर्षाद्यभावेपि प्रार्थनात्यस्येष्टत्वात्। अत्र निरपेक्षत्वमपि भगवत्स्वरूपभजनातिरिक्तनिरपेक्षत्वमेव। न हि भगवदीया भगवति निरपेक्षाः, तथा सति ज्ञानमार्गपातात् १०, ११, १२, १३॥

[व्र.] "हराम्यघं हि स्मर्तॄणां हविर्भागं क्रतुष्वहम्। वर्णश्च मे हरिश्चेष्टस्तस्माद्धरिरहं स्मृत" इति भारते भगवद्वाक्यात्स्मर्तॄणां पापतत्फलयोर्हर्ता सर्वदेवात्मा तन्नियामकः "श्यामाच्छबल''मिति श्रुत्या स्वतः श्यामवर्णः पुरुषोत्तमो हरिः, ऐहिके एतज्जन्मसम्बन्धिकार्ये फलभोगे स्वमनोभिलषितसेवादिसाधने तत्सम्पादने च, परलोके एतज्जन्मान्तरभाविनि जन्मनि, चकारात्तत्र सुखदुःखफलभोगे भगवदिच्छानुरूपसर्वादिसाधने तत्सम्पादने सर्वथा "शरणं रक्षणे गेहे वधरक्षकयोरपी''ति कोशात्। ततस्ततः प्रमादादिभ्यो रक्षणात्मा, तत्र तत्र गेहात्मा, तत्तत्प्रतिबन्धनिवृत्त्यात्मा, तत्र तत्र ततस्ततो रक्षकश्च स्वयमेवास्तीत्यनुसन्धानमाश्रय इत्यर्थः। तेनात्र चित्तस्यैवं भगवत्प्रवणत्वरूपसेवाविशेषात्मा स्वीकृतः। अन्यैरपि "मामाश्रित्य यतन्ति ये" "मां हि पार्थ व्यपाश्रित्ये''त्यत्र चित्तसमाधानत्वेन इतरवैमुख्यपूर्वकशरणागतित्वेन आश्रयतया ग्रहणत्वेन व्याख्यातः, शरणागतिश्च रामानुजाचार्यै"स्तमेव शरणं गच्छे''त्यत्रानुवर्त्तत्वेन व्याख्यानात्। शङ्करभाष्ये तु "मामेकं शरणं व्रजे"-त्यत्र भगवदनतिरिक्तानुसन्धानत्वेन व्याख्यातः। मधुसूदनीये तु "अस्यैवाहं" "ममैवायं" "स एवाह''मिति त्रिधा, भगवच्छरणत्वं स्यात्साधनाभ्यासपाकत" इति भक्तिपूर्वकमेवमनुसन्धानत्वेन। अत्राप्येतदेव स्वीकृतम्, परन्तु, मायावादनिरासाद् ब्रह्मवादेनाविहितिभक्तेराधिक्येन चेति विशेषः। एवंप्रकारेण सदा येषां भावो भवेत्तदा तेषां भगवता आश्रयो दत्त इति ज्ञातव्यम्। कदाचित्कदाचिद्विच्छेदे तु साधनावस्था, कदाचिद्भवनेत्यारम्भदशा, रक्षकत्वमात्रभाने त्वाश्रयस्य भावित्वमित्याद्युक्तम्। अयमेवाश्रयो भक्त्यधिकारिणां भक्तिं पोषयन्नुत्तमः। तां जनयन् भक्तिमार्गीयः, जनयिष्यन् भक्तिमार्गानुकल्परूपः। एवमेव ज्ञानाधिकारिणां ज्ञानपोषणादि कुर्वन् तन्मार्गीयः। कर्मफलस्य वैराग्यस्य पोषणादिकं कुर्वंस्तन्मार्गीय इति ज्ञातव्यम्। एवं स्वरूपं निरूप्याश्रयरक्षणप्रकारमाहुर्दुःखेत्यादि। एवं चित्ते

**सदा भाव्यमित्यादिना** अग्रिमेणान्वयः। तथा च **दुःखहान्यादौ हरिः सर्वथा शरणं भाव्य** इत्यर्थादार्थिके कर्मयोगे सिद्धे दुःखहानावित्यादौ क्वचित् क्वचिन्निमित्तात् कर्मयोग इत्यनेन सप्तमी। तेन दुःखहान्यर्थं शरणं गतस्य शरणदानाज्ञानजनितं जीवबुद्ध्या दुःखं, तद्धान्यर्थे तथेत्यर्थः। एवमग्रेपि। साम्प्रदायिकाभिप्रेते विषयसप्तमीपक्षे तु दुःखहानिविषये तथेत्यर्थः। एवमग्रेपि। दुःखनिवृत्तौ आश्रयविस्मरणाभावार्थमुपदेश इति **श्रीरघुनाथचरणाः**। भक्तिमार्गीयस्य सेवायां प्रवृत्तस्य दुःखप्रतीकाराकरणाद् दुःखहानौ धैर्येण चित्तोद्वेगादिसम्भवात् तदभावार्थं शरणभावनमेव कर्तव्यमित्येतदर्थमिति **चाचागोपीशाः**। **गोकुलोत्सवास्तु** नात्र किमपि व्याचख्युः। एवं सर्वत्र तत्तद्ग्रन्थाद्विशेषोऽवसेयः। तत्रापि भक्तिं पोषयन् सपरिकर आश्रयो **गोपीशैर्विवृतः**। भक्तिं जनयन् जनयिष्यँश्चेत्युभयविधः प्रकारभेदेन **श्रीरघुनाथचरणैर्गोकुलोत्सवैश्च** विवृतः। अत्र त्वाधुनिकानां श्रीमदाचार्यमार्गप्रविष्टानामपि स्वभावभेदेन तत्तद्रुचिदर्शनात्तत्तदधिकारानुसारेण तत्फलसिद्ध्यर्थं सर्वप्रकारको दिङ्मात्रं प्रदर्श्यत इति न कोपि क्वापि विरोधः। **तथा पाप** इति। सेवादिप्रतिबन्धकपापे दैवाज्जाते वा भगवदपराधे वेत्यर्थः। **भये,** स्वस्य जीवस्य तुच्छत्वात्कथं ब्रह्मादिदुरापचरणरेणोः प्राप्तिरिति **भये,** भयान्तरे च। **कामाद्यपूरणे,** काम आद्यो येषां, तद्गुणसंविज्ञानः, अलौकिककाममुख्यामुख्यगुणज्ञानात्मकमोक्षाणां **पूरणे** पूर्त्यर्थं **कामादेरपूरणे वा** ॥

स्वस्य कामादिपूर्तौ तस्या अन्यत्रादर्शने **मदाद्** अवज्ञायां, प्रकारान्तरेण वा **द्रोहे,** भक्तद्रोहापराधो मर्यादायामपि न दूरीकर्तुं शक्यते, यथा दुर्वाससोम्बरीषयोः विषये, किं पुनः पुष्टिमार्गे। अतस्तन्निवृत्त्यर्थमयमुपदेशः। **स्वस्य,** स्वीयानां चोत्कटानुत्कटभक्त्यनुत्पत्तौ दुःसङ्गादिना तन्नाशे च। **भक्तैश्चातिक्रमे कृते** तत्सहनार्थमयमुपदेशः। ते विना निमित्तं सर्वथा कमपि नातिक्रामन्ति। अथातिक्रामन्ति तदा स्वस्मिन्कोपि दोषोस्ति। ततस्तन्निवृत्त्यर्थमयमिति **चाचागोपीशाः**। **अशक्ये वा सुशक्ये वा,** वा शब्दोप्यर्थः। स्वकृत्यसाध्ये स्वकृतिसाध्ये च **सर्वथा** व्याख्यातप्रकारेण कायवाङ्मनोभिर्वा सर्वदुःखहर्त्तैव **शरणम्**। **सुशक्ये** शरणोपदेशोऽहङ्काराभावार्थ इति **चाचाः**। एवं विशेषेणायं सर्वोप्युपदेशो विवेकाभावेपि आश्रयस्यासहायशूरत्वार्थ इति मम प्रतिभाति। धैर्याभावेपि तथात्वार्थमाहुरहङ्कारेत्यादि ॥

**अहङ्कारकृते** अभिमानेन कृते, तद्दोषनिवृत्त्यर्थमभिमाननिवृत्त्यर्थं चायमुपदेशः। **चकारः** सर्वत्रानुक्तसजातीयसमुच्चयार्थः। **एवकार** उपायान्तरानुष्ठानव्युदासार्थः। **पोष्यपोषणरक्षणे** [पोषितुमावश्यकानां पोषणं येन तत् पोष्यपोषणम्, आवश्यकलौकिकोपयोगिद्रव्यादि तस्य रक्षणे,] सम्भावनेन तद्रक्षणस्य लौकिकत्वात्तत्करणे स्वस्य सेवादिविघातादरक्षणे भगवत्पोष्यानां क्लेशादुभयसामञ्जस्यार्थमिदम्। पोषणक्रियासहितरक्षणक्रियायां वा

पोष्यातिक्रमणे। पोष्यैः सह निवेदितैः कृते, स्वयं वा तेषां कृतेऽतिक्रमणे आसुरे भावं विना तद्भावात्तत्तन्निष्ठतन्निवृत्त्यर्थं स्वप्रयत्नत्यागार्थं चेदम्। तथान्तेवास्यतिक्रमे, अत्रापि तथा। तस्मिन्स्वकृतोपकाराद्यनुसन्धानेन गर्वाद्यनिष्टसम्भवात्तन्निवृत्त्यर्थं पृथगुपदेशः ॥

अलौकिकमनःसिद्धौ, निमित्तात्सप्तमी। "मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च। अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जित"मिति श्रुतेः। कामसङ्कल्परहितमनःसिद्ध्यर्थं सेवाश्रयाद्यनुकूलमनःसिद्ध्यर्थमित्यर्थः। **सर्वार्थे** पुष्ट्यादिमार्गीयसकलपुरुषार्थाद्यर्थम्, अतिदीनभावसिद्ध्यर्थोऽयमुपदेशः। **शरणं हरिः**। व्याख्यातमेतत्। एवं विषयमुपदिश्य रक्षणप्रकारमाहुरेवमित्यादि। चित्ते भावनेन भगवानाश्रयं ददाति। क्षणमात्रमप्यासुरावेशाभावार्थं **सदेति**। **वाचा परितः कीर्त्तनेन** मार्गः प्रचलति। तेनोभयोपदेशः ॥१०, ११, १२, १३॥

[दी.] **अन्यस्य भजनं तत्रेति**।

[गो.] नन्वेवमपि सति महत्यशक्य एवार्थे हरिः शरणं भावनीयः स्वशक्यार्थे भगवति भारः किमर्थं देय इति तदर्थं देवान्तरभजनं चेत् कुर्यात्तत्राहुरन्यस्येति।

[गो. उ.] शरणसिद्ध्यर्थमाहुरन्यस्येति।

[व्र.] कायिकमाहुरन्यस्येत्यादि।

**अन्यस्य भजनं तत्र स्वतो गमनमेव च।**
**प्रार्थनाकार्यमात्रेऽपि तथान्यत्र विवर्जयेत् ॥ १४ ॥**

[दी.] तत्र तस्मिन्नाश्रयरूपेऽर्थे सम्पन्ने, **अन्यस्य** भगवद्भक्तव्यतिरिक्तस्य **भजनं** सेवनं **स्वतो गमनं** स्वस्यानाकारितस्य स्वस्य तत्समीपे गमनम्। चकारात्तेन सह शारीरसम्बन्धोपि न कार्यः। **कार्यमात्रेऽपि** कर्तुं विहिते स्वधर्माविरोधिनि कर्तव्येऽर्थे प्रार्थना कार्येति शेषः। प्रार्थनीयो भगवान् तद्भक्तो वा। अत एव विष्णुधर्मोत्तरे शङ्करगीतासु "अपृष्ट्वा यस्तु यां काञ्चित् क्रियां नारभते हरिम्। असम्भिन्नार्थमर्यादस्तस्य तुष्यति केशव" इति। **तथान्यत्रेति**। यथा भगवति प्रार्थना **तथान्यत्र** विरोधिनि विशेषेण (तां) वर्जयेत्। यद्वा, भगवति विहिते कार्ये स्वधर्माविरोधिनि प्रार्थना, तथा **अन्यत्र** स्वधर्मविरोधिनि (कार्ये) न कार्येति ॥ ननु भगवत्प्रार्थनायामपि भगवाँस्तु साक्षान्न वदत्येव किमपि, किन्त्वाचार्योक्तसङ्केतग्रहेणानुमीयते, इदमुक्तमिदं नोक्तमिति ॥ १४ ॥

[गो.] **अन्यस्य** देवान्तरस्य **भजनं स्वतस्तदर्थगमनमपि वर्जयेन्न** कुर्यात्। चकारादन्यप्रेरणयापि तत्र न गच्छेत्। यदि न वर्जयेत्तदा शरणपदार्थो गच्छेदित्यर्थः। इदमेवोक्तं 'न्यासादेशेषु' इत्यत्र 'मदितरभजनापेक्षण'मिति॥ ननु प्रभौ प्रार्थनाया अनुचितत्वात् कदा-

चित्पदार्थापेक्षायां देवान्तरादौ प्रार्थनामात्रं कुर्यान्न तु भजनगमनादिकं, तत्राहुः प्रार्थना इति। यथा अन्यस्य भजनगमनादिकं न कुर्यात्तथा कार्यमात्रे महति स्वल्पेपि वा प्रार्थना अपि विवर्जयेत्। विशेषेण सर्वथा न कुर्यात्, कापि प्रार्थना न कार्येति बहुवचनमुक्तम्। [चिह्नान्तर्गः पाश्चात्योयं प्रक्षेपो वर्तते ॥] * अत्र केचन पूर्वपक्षं कुर्वन्ति, प्रार्थनारहिता न केपीति, यतो लौकिकं पारमार्थिकं वा सर्वेषां प्रार्थनीयमस्ति। परमविरक्ता अपि पारमार्थिकं प्रार्थयन्त्येव। केचन मुक्त्यादिकमपि न वाञ्छन्ति, तथापि भगवच्चरणारविन्दानुरागरूपां भक्तिं प्रार्थयन्त्येव। ते तु तादृग्भक्त्युत्पत्त्यनन्तरं किमपि न प्रार्थयन्तीति चेत्तदात्यन्तं परमप्रेमासक्तिव्यसनवन्तो व्रजवासिनस्ते तु स्थले प्रार्थितवन्तः। अन्ये तु मुक्त्यादिकं प्रार्थयन्ति। व्रजवासिनां तु दावानलक्षुद्वृष्ट्यादिजनितलौकिकप्रार्थना तीष्टतीति तद्रहितभक्तजनाभावात् प्रार्थनानिषेधः कथं क्रियते। तत्रोच्यते। रे दुर्विदग्ध ! सन्दिग्धतयैव विदग्धंमन्योसि, यतो यद्ब्रह्मादीनां मनसाप्याकलयितुं न शक्यं तत्स्वरूपे ये सुस्निग्धाः प्रेमासक्तिव्यसनिनः, येषां तद्व्यतिरिक्तं लौकिकं पारमार्थिकं वा न किञ्चनास्ति, तेषां लौकिकनिमित्तप्रार्थनादिकं ब्रवीषि। यदि वदसि श्रीशुकैरुक्तं, तत्रोच्यते। एतत्स्वरूपानभिज्ञ ! स्वरूपनिष्ठः सन् शृणु। येषां तदन्तराये त्रुटिर्युगायते तेषां तदन्तरायस्यासहिष्णुत्वात् स्वानिष्टे सम्पन्ने सम्भवतीति प्रार्थनं व्यसनस्वभावेन, न तु स्वनिष्ठं भवतीति कुतो लौकिकनिमित्तप्रार्थनसम्भावनापि। यद्यपि तादृशानां मध्ये अनिष्टं न सम्भवति, तथापि तत्र क्रीडारसावेशेन यत्किञ्चिदपि प्रभौ स्वसाम्याधिक्यज्ञाने तन्निरोधार्थं प्रभुणैव क्रियत इति ज्ञेयम्। अन्यथा तन्निरोधो विशेषरसानुभवश्च न भवेत्। एतदेव दावानलप्रस्तावे गोपेषु भगवति लौकिकभावेन स्वसाम्येनैव क्रीडासक्तेषु, गोषु च तृणलोभेन भगवन्तं विस्मृत्य वनगह्वरं प्रविष्टासु प्रपत्तिहीनैः सह भगवत्क्रीडा न भवतीति तन्निरोधार्थं प्रभुणैव वनाग्निरुत्थापितः। अन्यथा तादृशप्रभुक्रीडायां विघ्नकरणे कः समर्थः। अत एव तत्प्रपत्त्यनन्तरमेव तस्य या शान्तिः कृता सापि प्रभुणैव कृता, न तु साधनैः। तत्केवलं स्वीयत्वं ज्ञापनाय, इतरसम्बन्धे स्वीयत्वाभावात्। अग्रे तैरपि तथैव विज्ञापितं तदा, 'नूनं त्वद्बान्धवाः कृष्ण न चार्हन्त्यवसीदितुम्। वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणा' इति। अस्यार्थस्तु ये केवलं त्वद्बान्धवा एव तेपि नावसीदन्ति, किं पुनः प्रपन्ना इति। स्वप्रपत्तिं ज्ञापयन्ति वयमिति। अत्रायं गूढाभिसन्धिः। केवलं बन्धुत्वेन तत्स्वभावात् कदाचित् स्वसाम्येनापि प्रभुणा सह क्रीडादिकं सम्भवति। एवमिदं तत्प्रपन्नानामनिष्टकारकं तदस्माकं पूर्वं जातमिति स्वापराधनिवेदनं, तथापि सा क्रीडास्माकं त्वां विना न भवति, किन्तु, त्वया सहैव, त्वद्व्यतिरेकेण जीवनमेव न भवेदितिविशेषणद्वयेन द्योत्यते। अतः सर्वात्मना प्रपन्नानां नो वनाग्निभयं न भवति, किं तर्हि, पूर्वोक्तापराधेन महदनिष्टे सति त्वत्स्वरूपान्तरायस्तु ततोप्यसह्य इति प्रार्थनमिव कुर्वन्तः स्वापराधं प्रपत्तिं च

ज्ञापयन्ति। अत एव पूर्वश्लोके सर्वथा प्रार्थनाया अनौचित्यमित्यभिप्रायेणैव त्रातुमर्हथेत्युक्तं, न तु "त्राही"ति । पूर्वमपि कालियसङ्गानन्तरं दावानलोद्गमे 'न शक्नुमस्त्वच्चरणं सन्त्यक्तुमकुतोभय'मित्येवोक्तम् । दाहस्तु सोढुं शक्यो न तु चरणवियोग इति विवरणे विवृतं, न हि व्यसनव्यतिरेकेणैवं वचनं सम्भवतीतिभावः ॥ ननु पूर्वमेवं कथमेतादृशी प्रपत्तिर्न कृता तत्राहुः 'सर्वधर्मज्ञे'ति । सर्वं धर्मं त्वमेव जानासि, वयं तु मूढाः, अतोस्माकं तदुपदेशाभावेन तदज्ञानात् क्रीडारसावेशेन त्वत्प्रतिपत्तिविस्मृतिर्भवतीत्यर्थः । इदानीं प्रमेयबलादेव तज्ज्ञानं जातमिति सर्वथा प्रपन्नानामस्माकं त्वत्स्वरूपान्तरायो मा भवत्विति स्वरूपासक्तिस्वभावेनैव प्रार्थनमिव कुर्वन्तः स्वशरणगतिरेव ज्ञापितेति सर्वमनवद्यम् ॥ नन्वेतावदपि प्रार्थितमिति चेत्तत्रोच्यते । रे कुतर्काप्रतिष्ठितमते ! शृणु । श्रीगोकुलं तु केवलं तदेकपरं, तेषां भावोपि तादृश एवेति तादृशस्य तस्य प्रभुरपि स्वयं तदेकपर एवेत्युभयोः परस्परैकपरत्वमेव लोके ज्ञापयितुं तन्नियन्तृत्वेन प्रभुणैव तथा प्रेरितं यथा तैः प्रार्थितं, तदनन्तरं तदैव स्वयमेव साक्षात्तन्निवृत्तिं च कृतवानिति न तत्कृतप्रार्थिनेति निगर्वः। प्रकृतेऽपि प्रपत्त्यभावे कृतेपि प्रार्थने तन्न करोतीति स्वस्य तादृशं प्रति तत्परत्वाभाव एव ज्ञाप्यत इति भावः । प्रार्थनादिनिषेधस्तु साधनदशायां, न तु फलानुभवे । तथा च, श्रीगोकुलं तु फलरूपं फलोपयोगिसर्वरसात्मकं भगवता स्वलीलार्थं स्वस्वरूपेणैव साक्षात्प्रकटीकृतम् । सा लीला बहिर्लोकानुसारिणी, अन्तस्त्वलौकिकी, बहुप्रयोजनगर्भितेति यथा यथा तत्तद्रसात्मिकास्तास्ता लीला भवेयुः, ततः स्वमाहात्म्यगुणादिकं सर्वजनीनं च भवेत्तथा तथा भगवानेव सर्वं करोति, न तु तेषां तत्स्वरूपव्यसनवतां तदन्यत्किञ्चिदपेक्षितम् । अत एव द्विजपत्न्यनुग्रहं कर्त्तुं मनसैव तादृशानां क्षुधामुत्पादितवान् । अन्यथाकस्मिकी तादृशी दुःसहा सा कथमुत्पद्येत । एवं सति श्रीगोकुले तत्तन्निरोधार्थं सर्वं भगवानेव करोतीति न किञ्चित्पूर्वपक्षावसरः । किञ्च, तेषां स्वरूपापेक्षापि आसक्तिव्यसनस्वभावत एव, न तु कृत्रिमा । तादृशी चेत् प्राप्तौ शाम्येत । इयं तु तत्प्राप्तावपि उत्तरोत्तरं वर्द्धत इत्येतस्याः सर्वतो भिन्नेव रीतिर्नान्यमार्गीयपूर्वपक्षादिना कलुषयितुं योग्येति दिक् । किञ्च, प्रार्थनं तु यावन्मनोरथं भवति, प्रकृते मनोरथान्तमानन्दं दत्तवान् इति प्रार्थनानपेक्ष एव सर्वकर्त्तेति किमर्थं प्रार्थनं भवेत् । यत्र दृश्यते तत्र हेतुः पूर्वमुक्त एवेति सर्वं सुस्थम् । एवं सति श्रीगोकुलस्वरूपलीलाकृतीनामज्ञानात् तत्प्रार्थनावलोकनेन तदितरस्यापि प्रार्थना कर्त्तव्येतिपक्षो निरस्तः ॥ १४ ॥

[गो. उ.] देवान्तरस्य भजनं, तत्र देवान्तरसमीपे मार्गवशाद्यभावेपि स्वेच्छया गमनम्, चकारात्तदर्थमन्यप्रेरणं च विवर्जयेत् । भगवति च कार्यमात्रे अल्पेपि कर्त्तव्ये अथवा सर्वेषु कर्त्तव्येषु प्रार्थना वर्जयेत्। अत्यशक्यार्थे प्रभौ प्रार्थनायां कृतायामपि मुहुः प्रार्थना न कार्येति बहुवचनम् । तथा प्रभुवद् अन्यत्र देवान्तरे प्रार्थना विशेषण वर्जयेत् ॥१४॥

[त्र.] अन्यस्य भगवदतिरिक्तस्य भजनं वर्जयेत्। अन्यं देवत्वेन कामपूरकत्वादिदुराशया वा न सेवेत। तत्र स्वतो गमनमेव च, तत्कारणभूतं तत्र तत्समीपे स्वत उद्यम्य गमनं च वर्जयेदेव। "यावदन्याश्रयस्तावद्भगवानपि तं जनम्। विलोकयेन्न दयया ह्यनन्यजनवत्सल" इति वाक्यादन्याश्रये भगवानाश्रयमपि न दद्यादिति ज्ञापनार्थेवकारः, कौतुकार्थमप्यग्निकालयगमने नन्दग्रासस्योक्तत्वाच्च। मध्येमार्गं सामीप्ये जाते त्ववज्ञां न कुर्याद्, भगवत्सेवकत्वावयवत्वादिकं भावयेदित्यपि सूचितम्। प्रार्थनाः कार्यमात्रेपि वर्जयेत्। तेन कार्यव्यथामोहे भगवति प्रार्थनां कदाचित् सकृत्कुर्यादपीति सूच्यते। श्रीरघुनाथचरणैस्तु प्रार्थनापदं प्रथमान्तं कार्येत्यध्याहृत्य व्याख्यातम्। "अपृष्ट्वा यस्तु यां काञ्चित्क्रियां नारभते हरिम्। असम्भिन्नार्थमर्यादस्तस्य तुष्यति केशव" इति विष्णुधर्मीयशङ्करगीतावाक्येनोपष्टब्धं च। तथा च प्रार्थनापदं विज्ञापनमात्रपरमिति तेषामाशयः। एवं च न पूर्वग्रन्थविरोधोपीति युक्ततरमेव तैर्विमृष्टम्। याचनव्यवहारासाधारणकारणीभूतः कायादिव्यापारोयं ददात्वित्यभिसन्धिपूर्वको वा सः प्रार्थना। तद्कारणमनभिसंहितं स्वज्ञातवस्तुस्वरूपमात्रकथनं विज्ञापनमिति तयोः स्वरूपभेदादुचितं चैतत्, स्वाम्यधीनत्वदार्ढ्येन विवेकोपष्टम्भात्, आज्ञाया विलम्बे धैर्यस्याप्युपष्टम्भादाश्रयदार्ढ्येन तस्य शीघ्रं स्वकार्यक्षमत्वसिद्धेरिति। तथान्यत्र विवर्जयेत्। यथा भगवति सकृत्प्रार्थनं सर्वविज्ञापनं च, तथेतरेषु विशेषेण वर्जयेत्। तदुभयमपि सर्वथा न कुर्यादित्यर्थः। मनसाप्यविचारणं वर्जने विशेषः। एवं कायिकमुपदिष्टम् ॥ १४ ॥

[दी.] तत्र जीवानामविश्वासः सम्भावित इति चेत्तत्राहुरविश्वासो न कर्तव्य इति।

[गो.] प्रस्तुतमाहुः*। ननु सर्वेषां देवानां धर्माणां च त्यागेन भगवच्छरणगतावपि को वेद भगवानपेक्षितं दास्यति वा न वेति चेत्तत्राहुरविश्वास इति।

[गो.उ.] नन्वेवं सति कथमिष्टसिद्धिः। प्रभुरपेक्षितं कुर्यान्न वेति चेत् तत्राहुरविश्वास इति।

[त्र.] अतः परमेतत्सर्वसिद्ध्यर्थं बाधकत्यागोऽवश्यं वक्तव्यस्तमाहुरविश्वास इति।

**अविश्वासो न कर्तव्यः सर्वथा बाधकस्तु सः।**
**ब्रह्मास्त्रचातकौ भाव्यौ प्राप्तं सेवेत निर्ममः ॥ १५ ॥**

[दी.] आचार्योक्तमार्गे यद्यविश्वासस्तदा कृतं सर्वं व्यर्थं भवेदित्यर्थः। अविश्वासस्य महाबाधकत्वानुसन्धानेन सर्वथा स न कार्य एवेत्यर्थः। विश्वासदार्ढ्यार्थं किञ्चित्स्मरणीयमाहुब्रह्मास्त्रचातकाविति। ब्रह्मास्त्रं चातकश्च तौ भाव्यौ, विश्वासार्थं स्मरणीयौ। अत्रायं भावः। यथा हनुमान् ब्रह्मास्त्रेणाप्रतिकार्येण बद्धोपि बन्धकानामविश्वासेन मुक्तः। पश्चादुद्यमः सर्वोपि व्यर्थो जातः। अत्राविश्वासस्य महादोषहेतुत्वे ब्रह्मास्त्रं दृष्टान्तः। विश्वासमा-

त्रस्य सर्वकार्यसम्पादकत्वे चातको दृष्टान्तः । स यथा चातकः कश्चन पक्षी वर्षासु महज्जलमप्यनास्वाद्य स्वातिजलमल्पमप्यास्वाद्य पुनर्वर्षपर्यन्तं तत्प्रतीक्षया जीवन् यथापूर्वमेव तिष्ठति, तस्य तु सर्वं स्वातिबिन्दुविश्वासेनैव योगक्षेमादिनिर्वाहो यथा, तथा सर्वं विहायाचार्योक्तमार्गविश्वासेन सर्वं भवेदेवेत्यत्र तात्पर्यम् । **प्राप्तं** स्वमार्गमर्यादया कर्तव्यत्वेन प्राप्तं **सेवेत** कुर्यादित्यर्थः । **निर्ममो** निरहङ्कार इत्यर्थः । स्वयं बहुज्ञत्वाद्यभिमानेनाचार्योक्तौ कुसृष्टिकल्पनं न कार्यमिति भावः ॥ १५ ॥

[गो.] अस्मिन् शरणगमनेऽविश्वासो न कार्यः, **सर्वथा यो बाधकः** । बाधकान्तरापेक्षयाऽयमधिकबाधक इति **सर्वथे**त्युक्तम् । यतोऽविश्वासेन धर्मान्तरसम्बन्धे शरणधर्मो गच्छेद्, इदमेवोक्तम् 'अन्यसंमेलने वा ब्रह्मास्त्रन्याय उक्त' इति । तेन विश्वास एव कर्त्तव्य इति भावः । अतः परं विश्वासे फलं भवत्यविश्वासे नेत्यत्र दृष्टान्तं निरूपयन्ति **ब्रह्मास्त्रे**ति । अविश्वासे ब्रह्मास्त्रं भाव्यं भावनीयमित्यर्थः । यथा हनुमद्विषये प्रयुक्तमपि तेषामविश्वासेन धर्मान्तरसम्बन्धे ततो निर्गतमासीत्तथात्राप्यविश्वासेन धर्मान्तरसम्बन्धे शरणमन्त्रो यास्यति शरणधर्मो न तिष्ठतीति स **न कर्त्तव्य** इति भावः । विश्वासे चातको भाव्यः । स्वातिजलविश्वासेन चेत्स तिष्ठति तदा मेघो वर्षत्येव, स च पिबतीतिभावनया विश्वास एव कर्त्तव्यो, नत्वविश्वासः । शरणगतौ विश्वासे भगवान् सर्वं करिष्यतीति भावः । एवं विश्वासेन शरणस्थितौ भगवदिच्छया प्रयत्नं विना यदेव **प्राप्तं** भवेदनायासेन स्वल्पमपि तदेव प्राप्य, तत्रापि **निर्ममः** भगवदीयत्वात्तत्रापि ममतारहितः सन् प्रभुसेवां कुर्यान्न तु विशेषार्थं यत्नं कुर्यात्तदेवाहुः **प्राप्त**मिति । **सेवे**तेतिपदेन तत्सर्वं भगवदुपयुक्तमेव कुर्यान्न तु स्वार्थमिति सूचितम् ॥१५॥

[गा. उ.] भक्तिमार्गे **अविश्वासो न कर्त्तव्यः**, "ये यथा मां प्रपद्यन्त" इति वाक्यात्, **स सर्वथा बाधकः** । विश्वासस्तु कर्त्तव्यः । अनयोः ( विश्वासाविश्वासयोः ) क्रमेण बाधकत्वसाधकत्वयोर्**ब्रह्मास्त्रचातकौ** भाव्यावनुसन्धेयौ । लङ्कायां राक्षसैर्ब्रह्मास्त्रेण बद्धो हनुमान्न चलितवान्, ततस्तैरन्यैः पाशैर्बद्धमारब्धो ब्रह्मास्त्रे राक्षसानामविश्वासं दृष्ट्वा स्वयमपि ब्रह्मास्त्रमर्यादामुल्लङ्घ्य ततश्चलितवान् । ततो ब्रह्मास्त्रं व्यर्थमभूत् । एवं भक्तिमार्गाविश्वासे भक्तिमार्गीयं सर्वं व्यर्थं भवति । **चातकः** पक्षिविशेषः, स्वातिर्वर्षिष्यति स्वातिजलमेव मया पेयमिति विश्वासेन महदन्यत् जलं विहाय तिष्ठति, तदर्थं स्वातिर्वर्षति स पिबति । एवं भक्तिमार्गे हरिः सर्वं करिष्यतीति विश्वासेन भक्तिमार्गमर्यादां गृहीत्वा यस्तिष्ठति तस्य योगक्षेमनिर्वाहं प्रभुः करोति, "तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह"मिति वाक्याच्च । सर्वं भगवत एव, अहं भगवद्दासो भगवद्दत्तमेव भगवते समर्पयामीति ममत्वं त्यक्त्वा **प्राप्तं सेवेत निर्मम** इति ॥ १५ ॥

[व्र.] "मदुक्ता"विति शेषः। "आश्रय" इति वा। सर्वथेति, स्वरूपतः फलतश्च। तु पूर्वपक्षनिरासकः। "यस्य स्याद्‌द्धा न विचिकित्सास्ती"ति श्रुतिम्, "अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यती"त्यादिस्मृतिं च प्रमाणत्वेनाक्षिपति। तर्हि तन्निवर्त्तनायोपायो वक्तव्य इत्यत आहुः ब्रह्मास्त्रेत्यादि। ब्रह्मास्त्रं चातकश्चेत्युभौ अविश्वासस्य बाधकत्वे विश्वासस्य साधकत्वे च यथायथं भाव्यौ चिन्तनीयौ, तयोर्वृत्तान्तः स्मर्त्तव्य इत्यर्थः। यथा लङ्कायां राक्षसैर्ब्रह्मास्त्रेण हनुमान् बद्धस्ततस्तं बद्धं निश्चेष्टमालोक्य ते रज्जुभिर्बद्धुमारब्धस्तदा तेषां विश्वासाभावं दृष्ट्वा ब्रह्मास्त्रं ततो निर्गतं, हनुमान्मुक्तबन्धनो रज्जुबन्धनानि बभञ्ज, तेन तेषां प्रयोगप्रयासो व्यर्थोऽभूत्, तथात्राविश्वासे भगवानपि त्यजति भक्तिमार्गे शरणमार्गे च प्रवृत्तिरपि वृथा भवतीत्यविश्वासे दृष्टान्तः। चातकः पक्षिविशेषः, स च स्वातिबिन्दु-मासाद्यावर्षपर्यन्तं विश्वासेन तिष्ठति, तेन तस्य क्षेमं निर्वहति, पुनश्च स्वातौ पर्जन्यो वर्षत्येव। तथात्र श्रीमदाचार्योक्तौ विश्वासे, तथा भगवति मार्गे च विश्वासे सर्वं सिद्ध्यतीति विश्वासे दृष्टान्तः। तथा चाविश्वासं परित्यज्य विश्वासं कृत्वा प्राप्तं सेवेत निर्ममः, लौकिके ममतां परित्यज्य यदृच्छया प्राप्तं सुखं वा दुःखं वा तत्साधनं वानुभवेन्न तु तत्राभिनिवेशे-तेत्यर्थः॥ १५ ॥

[गो.] ननु धर्मान्तरसम्बन्धे शरणपदार्थौ गच्छतीत्यावश्यकलौकिकवैदिककर्मणामपि त्यागे कदाचिदप्रामाण्यशङ्का स्यान्मार्गे, तदभावार्थं तत्करणप्रकारमाहुर्यथाकथञ्चिदिति।

[गो. उ.] नन्वेवं ममत्वाभावे भगवत्कार्यातिरिक्तं कार्यं न कर्त्तव्यमिति चेत्तत्राहुर्यथा-कथञ्चिदिति।

[व्र.] अनभिनिवेशे लौकिकादिनिर्वाहप्रकारमाहुर्यथाकथञ्चिदित्यादि।

**यथाकथञ्चित्कार्याणि कुर्यादुच्चावचान्यपि।**
**किं वा प्रोक्तेन बहुना शरणं भावयेद्धरिम्॥ १६॥**

[टी.] यथाकथञ्चिदिति। लोकवेदकुलाचारप्राप्तानि कर्माणि येनकेनापि प्रकारेण कुर्यान्न तु परित्यजेत्। उच्चं च, अवचं च, उच्चावचं, तानि उच्चावचानि, उत्कृष्टनिकृष्टानि। यद्यपि भगवद्धर्मापेक्षया सर्वाण्यन्यानि कर्माणि हीनान्येव, तथापि लोकानुसारेणोत्तमाधमत्वं ज्ञेयम्। ईदृशामपि सर्वथाकरणं भगवानेवाह, 'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्'। आश्रयस्य विवेकधैर्यापेक्षयात्यावश्यकत्वं कर्मज्ञानोपासनादिभ्योपि सर्वथा साधकत्वं चाहुः किं वेति। वेति पक्षान्तरे। विवेकधैर्याद्यक्षमस्य महापापपतितस्यापि यथोक्ताश्रयणेनैव सकलपुरुषार्थसिद्धिरित्यर्थेन बहुना प्रोक्तेन पुनः पुनर्वचनेन किम्, न किमपीत्यर्थः॥१६॥

[गो.] यथाकथमपि मार्गे लोकानामप्रामाण्यशङ्का न भवेत्तथोच्चावचान्यावश्यकलौकि-

कवैदिकसम्बधीनि कार्याणि मार्गप्रामाण्यार्थं प्रभोराज्ञां ज्ञात्वा तानि कार्याणि, न तु स्वधर्मत्वेनेति। यथा "करिष्ये वचनं तवे"ति पार्थेन भगवदाज्ञा कृता तथेत्यर्थः। एवं सति शरणपदार्थो न गच्छेत् इति पूर्वोक्ता शङ्का निरस्ता। तदेवोक्तं पुष्टिप्रवाहमर्यादायां "लौकिकत्वं वैदिकत्वं कापट्यात्तेषु नान्यथे"ति। अथवा, तदर्थमपि कर्माद्यकरणे न दोषः, शरणपदार्थस्यैव तावद्रूपत्वात्, तदाहुः किं वेति। बहुना प्रोक्तेन किम्, न किञ्चित्सिद्ध्यति, किन्तु सर्वत्र शरणमेव भावनीयं, न तु लोकसङ्ग्रहार्थमपि कर्मकरणम्। तदर्थमपि विधिरूपत्वेन कर्मकरणे शरणपदार्थाभाव इति भावः। एतदेवोक्तं 'मन्यसम्मेलने वे'त्यत्र। एवं सति प्रभोराज्ञां मत्वा कर्मकरणमायातं, नान्यथेत्यर्थः॥ नन्वेवं सर्वात्मना ज्ञानेन कदाचित्पापं सम्भवेत्, तत्राहुर्हरिमिति। स हरिः सर्वदुःखहर्ता तत्सम्भावनायां स एव पापादिकं दूरीकरिष्यतीति भावः। एतत्सर्वं 'सर्वधर्मा'नित्यस्य निरूपणे न्यासादेशेष्वित्यत्र द्रष्टव्यम्॥ १६॥

[गो. उ.] उच्चावचान्यनेकप्रकारकाणि, वैदिकानि लौकिकान्यप्यविरुद्धानि कार्याणि। यथाकथञ्चिद्, न विस्तारेण कुर्यात्, व्यवहारोपयोगित्वाद्, व्यवहारस्य परम्परया भगवद्भजनोपयोगित्वादित्यर्थः। कियन्तः प्रकाराः वक्तव्या इति सङ्क्षेपेणाहुः किं वा प्रोक्तेन बहुनेति। कर्मभिर्न मम निस्तारः, किन्तु, भगवदाज्ञया कृतैः भगवान्प्रसन्नः शरणं भवत्विति भावयेदित्याशयेनाहुः शरणं भावयेद्धरिमिति॥ १६॥

[व्र.] उच्चानि सेवार्थानि, अवचानि लौकिकार्थानि, उभयान्युभयविधानि वा यथाकथञ्चित् कुर्यात्, न तु ऋणादिना, नापि लौकिकसम्भ्रमेणेत्यर्थः। कथञ्चिन्निर्बन्धसम्भवे। तत्राप्युपायमाहुः किं वेत्यादि। बहुना प्रोक्तेन किम्। न हि यावन्तः प्रकाराः कालकर्मस्वभावसङ्गदेशादिनिबन्धना आनन्त्याद्वक्तुं शक्यन्ते। तस्मादिङ्मात्रेणोक्तेषु यः प्रतिविधानोपायः पूर्वमुक्तस्तमेव सर्वत्रानुसन्दध्यादित्याशयेनानुवदन्ति शरणं भावयेद्धरिमिति, "सर्वधर्मान्परित्यज्ये"त्यत्र "तस्मात्त्वमुद्धवे"त्यत्र च भगवता तथैव निर्द्धारितत्वाच्छरणागतेषु दर्शनाच्चेत्यर्थः। एतेनाज्ञाभावेप्याश्रयस्यासहायशूरता निर्द्धारिता॥ १६॥

[दी.] उपसंहरन्ति एवमिति।

[गो.] अतः परमुपसंहरन्ति एवमिति।

[गो. उ.] नन्वाश्रयनिरूपणेऽन्यस्य भजनवर्जनादिकं किमित्युक्तमित्याशङ्क्याहुरेवमाश्रयणमिति।

[व्र.] एवं मार्गमुपदिश्योपसंहरन्त्येवमित्यादि।

## एवमाश्रयणं प्रोक्तं सर्वेषां सर्वदा हितम्।

[दी.] एवमनुना प्रकारेण यदाश्रयणं तत् प्रोक्तम्। आश्रयणरूपं वस्तु प्रोक्तमित्यर्थः।

सर्वेषां पतितापतितस्त्रीशूद्रसाधारणानाम् । अत एव भगवताप्युक्तम् 'मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गति'मित्यादिना । सर्वदा समयानियमेन । हितमति सौख्यसम्पादकम् ॥ १६½ ॥

[गो.] एवंप्रकारेणाश्रयणमाश्रयस्वरूपं प्रकृष्टेन साङ्गमुक्तम् । तावता किमिति चेत्तत्राहुः सर्वेषामिति । सर्वेषां जीवानामाश्रमाणां वर्णानां सर्वदा क्रियमाणं सत् हितं हितकारि, साधनं विनाप्यैहिकपारलौकिकसम्पत्तिसाधकमित्यतः परं किमवशिष्यते ॥ १६½ ॥

[गो. उ.] "यावदन्याश्रयस्तावद्भगवानपि तं जनम् । आलोकयेन्न कृपया, अनन्यजनवत्सल" इति प्रह्लादवाक्यात् । अनेन प्रकारेण साङ्गमाश्रयणमेव प्रोक्तं तत्सर्वेषां वर्णानामाश्रमाणां च सर्वकालं सुखकारि ॥ १६½ ॥

[व्र.] एवमुक्तप्रकारेण आश्रयणं मार्गरूपं प्रोक्तं, प्रकर्षेण विवेकधैर्यसाहित्येन कैवल्येन चोक्तम् । तदिदं सर्वेषां वर्णाश्रमयुक्तानां तद्रहितानां च सर्वदाऽस्मिन्युगे युगान्तरे च सम्पदापत्काले च हितं यथाधिकारमुत्तमफलजनकम्, "मां हि पार्थ व्यपाश्रित्य" "किरातहूणान्ध्रे"त्यादिवाक्येषु तथैव निर्द्धारात् ॥ १६½ ॥

[दी.] ननु भक्तिज्ञानकर्मादिषु सत्सु सर्वं विहाय कथं तदेकपरतया स्थेयमित्यत आहुः कलाविति ।

[गो.] ननु सर्वयुगेषु साधनैरेव फलं भवतीत्यधुना तानि विहाय केवलं शरणमेव कथमुच्यते, तत्राहुः कलाविति ।

[गो. उ.] ननु मुख्या भक्तिः कुतो नोच्यत इति आशङ्क्य, "प्रायेणाल्पायुषः सूत कलावस्मिन्युगे जनाः । मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुता" इति कलावेतादृशा जनाः किं साधयेयुः । अशक्योपदेशे वाऽनाप्तत्वं स्यात् । इत्येवमाश्रये क्रियमाणे भगवान्कृपया भक्तिमपि दास्यतीत्याशयेनाहुः कलौ भक्त्यादिमार्गा हि दुःसाध्या इति मे मतिरिति।

[व्र.] ननु तर्हि भगवता "योगास्त्रय" इत्यत्र त्रय एव किमित्युक्ताः । पृथगयं कुत उक्त इत्यत आहुः कलावित्यादि ।

**कलौ भक्त्यादिमार्गा हि दुःसाध्या इति मे मतिः ॥ १७ ॥**

**श्रीमद्वल्लभाचार्यचरणविरचितो विवेकधैर्याश्रयग्रन्थः सम्पूर्णः ॥**

[दी.] भक्तिरादिर्येषां, कर्मज्ञानादयो दुःसाध्या देशकालद्रव्यादिसाधनवैगुण्येन कर्तुं न शक्या इत्यर्थः । हिशब्दो लोकवेदप्रसिद्धिद्योतनार्थः ॥ ननु लोके भवतु भक्त्यादीनामस्माकं तदकरणे किमायातम्, इति विशेषजिज्ञासायां स्वसम्मतिमस्मिन्नर्थे विश्वासार्थमाहुर्मे मतिरिति । मतिः सम्मतिरित्यर्थः ॥ १७ ॥

न शक्यं मे विवेकादिनिरूपणमथापि तु । त्वत्पदाम्बुजसन्ध्यानाध्यस्ताधीः कृतवानहम् ॥ १ ॥

इति श्रीमद्वल्लभनन्दनचरणशरणश्रीमद्रघुनाथकृतौ विवेकधैर्याश्रयदीपिका समाप्ता ॥

[गो.] अन्ययुगेषु धर्मस्यैव प्राधान्याद्विहितभक्त्यादीनां साधनसाध्यत्वात् तैरेव विहितभक्त्युपासनाकर्मादीनां फलं भवति । कलिस्तु पापप्रधान इति साधनानामसम्भवाद्विहितभक्त्यादिमार्गा दुःसाध्याः, प्रत्युत यत् किञ्चित्करणेपि पाषण्डप्रवेशेन पापमपि जायत इति सर्वथा दुःसाध्याः, यतो यत्र साधनसाध्या अपि भक्त्यादिमार्गाः कलौ दुःसाध्यास्तत्र कृतादियुगेष्वपि यो भक्तिमार्गः साधनासाध्यः केवलभगवदनुग्रहैकलभ्यस्तस्य कलौ सुतरामेव साधनासाध्यत्वेन दुःसाध्यत्वमिति सर्वात्मना शरणगतौ भगवान् तादृशे भक्तिमार्गेप्यनुग्रहं करिष्यतीति सर्वात्मना शरणमेव भावनीयं, नान्यत्कर्त्तव्यमिति स्वसिद्धान्तज्ञापनायोक्तं मे मतिरिति । मे मतिरित्येव । तेन स्वमार्गीयाणामिदमेव कर्तव्यं नान्यदिति भावः ॥१७॥

श्रीमदाचार्यचरणशरणस्मरणेन मे । हृद्यायाता प्रणालीयं ग्रन्थस्याध्वानुसारिणी ॥ १ ॥
भक्तिमार्गे स्वकीयस्य दार्ढ्यार्थं सर्वथा इमे । अपेक्षिता विवेकाद्यास्त्वेतदर्थं तदाश्रयः ॥ २ ॥
श्रीमदाचार्यचरणैरिति ते वर्णिताः स्फुटम् । अतस्त एव चरणास्तदर्थं शरणं मम ॥ ३ ॥

इति श्रीघनश्यामात्मजश्रीगोपीशचरणविरचिता विवेकधैर्याश्रयविवृतिः सम्पूर्णा ॥

[गो. उ.] भक्तिरादिर्येषां ते भक्त्यादयः । तेन च ते मार्गाश्च भक्त्यादिमार्गाः । प्रवाहिकभक्तिमार्गो मर्यादाभक्तिमार्गः पुष्टिभक्तिमार्गश्चेत्यर्थः ॥ १७ ॥

विवेकधैर्याश्रयाणां विवृतिः कृतिशर्मणे । श्रीगोविन्दसुतेनोक्ता गोकुलोत्सवसूरिणा ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीगोविन्दरायात्मजश्रीगोकुलोत्सवविरचिता विवेकधैर्याश्रयविवृतिः सम्पूर्णा ॥

[व्र.] तेषां साधनसापेक्षत्वादेककोटावुक्ताः, अयं तन्निरपेक्षोऽनुकल्परूपश्चेत्यतो भिन्नतयोक्तः। एतं भगवदाशयमहं जानामीत्याहुर्मे मतिरिति । तथा चैतद्ग्रन्थं मदाज्ञारूपमनुसन्धायाश्रयं कुर्वतां सर्वथा भगवानाश्रयं ददातीत्याशयः ॥

स्वरुचा तिरस्कृतपयोदरुचिं यमुनातटे रचितवेणुरवम् ।
व्रजनायकं रुचिररासकरं सततं विभावय मदीय मनः ॥ १ ॥

विवेकधैर्याश्रयाणां विवृतिस्तु यथामति । कृता तेन प्रसीदन्तु स्वाचार्याः सततं मयि ॥२॥
त्वदीयत्ववशाद्धाष्ट्यील्लिखितं यन्मयात्र तत् । भूयात्स्वाचार्यमोदाय बालधौर्त्यं यथा पितुः ॥३॥

इति श्रीमदाचार्यचरणैकतानश्रीश्यामलसुतश्रीव्रजराजविरचिता विवेकधैर्याश्रयविवृतिः सम्पूर्णा ॥

# વિવેકધૈર્યાશ્રય

**ગ્રંથપરિચયઃ**—ભક્તિની દૃઢતા વિશેષ થવા સારુ શ્રીમદ્દાચાર્યચરણોએ આ ગ્રંથ પ્રગટ કરેલો છે. એમાં વિવેક, ધૈર્ય અને આશ્રયનું સ્વરૂપ નિરૂપિત કરેલું છે.

શ્રી પ્રભુથી ચિત્તને વિમુખ ન થવા સારુ શ્રી પ્રભુ જ પોતાની ઇચ્છા પ્રમાણે સર્વ કરશે એવું દૃઢ અનુસંધાન સદા–સર્વદા રાખવાથી ચિત્ત વ્યગ્ર થશે નહિ. એ વિવેકનું મુખ્ય સ્વરૂપ છે. એવું અનુસંધાન રાખતાં કોઈ પદાર્થની અપેક્ષા થાય તો પણ પ્રભુને પ્રાર્થના કરવી નહિ, પણ એકાગ્ર ચિત્તે પ્રભુની સેવા જ કર્યા કરવી, એમ વિવેકનાં નવ સ્વરૂપ બતાવેલાં છે. ગમે તેવી આપત્તિ આવી પડે તોપણ ધૈર્યનો ત્યાગ કરી પ્રભુસેવાથી વિમુખ થવું નહિ. કેવી કેવી આપત્તિઓમાં ધૈર્ય રાખવું એ જણાવવા ધૈર્યનું સ્વરૂપ સમજાવેલું છે. પોતે ચલાવીને ઇન્દ્રિયોના કાર્યોમાં પ્રવૃત્ત થવું નહિ અને જ્યાં પોતાનાથી ધૈર્ય ન રહી શકે ત્યાં શ્રી પ્રભુની શરણભાવના કરવી. શ્રી પ્રભુની સેવામાં જે મનુષ્યો પ્રભુથી વિમુખ હોય તે દુઃખ આપે તોપણ એમનો અપરાધ નહિ ગણતાં પોતાનો જ દોષ ગણી શ્રી પ્રભુનો આશ્રય રાખવો એ આશ્રયના સ્વરૂપમાં કહેલું છે. ત્રિવિધ દુઃખો આવવાથી આશ્રય છૂટી જાય છે, તેથી એ દુઃખોની નિવૃત્તિના ઉપાયો જણાવીને શ્રી પ્રભુના આશ્રયનો ત્યાગ નહિ કરતાં પ્રભુ પર વિશ્વાસ રાખી પ્રભુઇચ્છાએ જે પ્રાપ્ત થાય તેટલામાં નિર્વાહ કરી સેવા કરવી. લૌકિક અને વૈદિક કાર્યો પણ લોકસંગ્રહ માટે જ કરવાં. કર્મ, જ્ઞાન અને ભક્તિ–એ ત્રણ માર્ગો ભક્તિ માટે કહેલા છે તે યથાર્થ રીતે થઈ શકે એવો આજનો સમય નથી, તેથી કેવળ શ્રી પ્રભુનો આશ્રય રાખવો. એમ સર્વાત્મભાવે કરીને શરણભાવના કરવી, બીજું કશું કરવું નહિ, એવો પોતાનો અભિપ્રાય દર્શાવેલો છે.

**विवेकधैर्ये सततं रक्षणीये तथाश्रयः ।**
**विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यति ॥१॥**

જે પ્રકારે નિરંતર વિવેક અને ધૈર્ય રાખવું યોગ્ય છે તેમ ભગવાનનો આશ્રય પણ રાખવો યોગ્ય છે. વિવેક તો એ સમજવો કે શ્રીહરિ પોતાની ઇચ્છાથી સર્વ કાંઈ કરશે. ૧

**પ્રથમ વિવેકઃ**—શ્રીહરિએ એનો અંગીકાર કર્યો છે માટે એને જે પદાર્થ અપેક્ષિત હશે તે પોતે જ સિદ્ધ કરશે એવો વિશ્વાસ રાખીને ભગવત્સેવા કર્યા જવી, પણ પોતાનું પ્રયત્નાદિ કરવું નહિ.

**બીજો વિવેકઃ**—સર્વના ઈશ્વર અને આત્મા શ્રી પ્રભુ ભક્તની ઈચ્છા વિકારવાળી હોય તો પોતાની ઈચ્છાથી સર્વ કરશે અને પ્રભુ સંબંધીની હશે તો ભક્તની ઈચ્છા પ્રમાણે કરશે.

प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयात् ।
सर्वत्र तस्य सर्वं हि सर्वसामर्थ्यमेव च ॥ २ ॥

સ્વામીના અભિપ્રાયમાં સંશય હોવાના કારણે, અથવા પ્રાર્થના કરવાથી પણ શું થાય? એ પ્રભુને તો સર્વત્ર નિશ્ચયે સર્વ સિદ્ધ છે અને એમનામાં સર્વ સિદ્ધ કરવાનું સામર્થ્ય છે જ. ૨

**ત્રીજો વિવેકઃ**—ભગવાનની ઈચ્છા જીવને કાંઈ પણ આપવાની હશે તો આપશે જ, પણ પોતાની ઈચ્છા આપવાની નહિ હશે તો કદી પણ આપશે નહિ, તો પછી પ્રાર્થના કરી ધર્મની હાનિ કરવી નહિ.

**ચોથો વિવેકઃ**—સર્વ વસ્તુ મેળવવાનું સામર્થ્ય ભગવાનમાં છે અને અસાધ્ય વસ્તુ પણ મેળવી આપે છે, માટે એમની સેવા ત્યજીને જે કાંઈ પ્રયત્ન કરવામાં આવે તે નિષ્ફળ છે.

अभिमानश्च सन्त्याज्यः स्वाम्यधीनत्वभावनात् ।
विशेषतश्चेदाज्ञा स्यादन्तःकरणगोचरः ॥ ३ ॥
तदा विशेषगत्यादि भाव्यं भिन्नं तु दैहिकात् ॥३½॥

સ્વામીની અધીનતાના વિચારથી અભિમાન પણ વાસના સહિત ત્યાગ કરવા યોગ્ય છે. પ્રભુ અંતરાત્મા છે એમની વિશેષ કરીને સેવા સંબંધી વિશેષ આજ્ઞા થાય ત્યારે એમ કરવું. જો એ આજ્ઞા દેહાદિક સંબંધથી જુદી હોય અને એ ભગવાનના સ્વરૂપ અને લીલા સંબંધની હોય તેવી આજ્ઞાની ભાવના કરવી. ૩–૩½

**પાંચમો વિવેકઃ**—જો દેહ અને ઇન્દ્રિય વગેરેને એના વિષયોમાં અભિમાનને લીધે સ્વતંત્રપણાથી રોકવામાં આવે તો એમનો તે તે વિષયોમાં વિનિયોગ કર્યો ગણાય, માટે દેહાદિ ભગવાનને અર્પણ કર્યાં છે અને એ એમને અધીન છે એવી ભાવના કરવી. બીજું કામ દોષરૂપ હોવાથી એ ત્યાગ કરવા યોગ્ય છે.

**છઠ્ઠો વિવેકઃ**—પ્રભુની સેવામાં ઉપયોગી વિશેષ આજ્ઞા થાય તે પ્રમાણે કરવા તત્પર રહેવું.

आपद्गत्यादिकार्येषु हठस्त्याज्यश्च सर्वथा ॥४॥

अनाग्रहश्च सर्वत्र धर्माधर्माग्रदर्शनम् ।
विवेकोऽयं समाख्यातो धैर्यं तु विनिरूप्यते ॥५॥

દુઃખાદિ પ્રસંગોમાં દુરાગ્રહનો સર્વ પ્રકારે ત્યાગ કરવો. ધર્મ અને અધર્મનું સૂક્ષ્મ અવલોકન કરવું. સર્વ વિષયોમાં આગ્રહ કરવો નહિ. આ વિવેકનું સ્વરૂપ કહેલું છે, હવે ધૈર્યનું સ્વરૂપ કહેવામાં આવે છે. ૪–૫

**સાતમો વિવેકઃ**—આપત્તિકાળમાં પ્રભુસંબંધમાં તેમજ લૌકિક સંબંધમાં વિના પ્રયત્ને જે મળે તેનાથી ચલાવવું. એ વિના ચાલશે નહિ, એવી હઠ કરવી નહિ.

**આઠમો વિવેકઃ**—ભગવત્સેવાનો ત્યાગ કરી બીજા વિષયોમાં સ્માર્ત તથા વૈદિક કાર્યો કરવામાં આગ્રહ કરવો નહિ.

**નવમો વિવેકઃ**—જે કાર્યો કરવાથી પાપ લાગે અને અધર્મ થાય તે કરવાં નહિ.

त्रिदुःखसहनं धैर्यमामृतेः सर्वतः सदा ।
तक्रवद् देहवद् भाव्यं जडवत् गोपभार्यवत् ॥६॥

મરણપર્યંત સર્વ પ્રકારથી નિરંતર ત્રિવિધ દુઃખો સહન કરવાં એ ધૈર્ય કહેવાય. દેહ સંબંધી દુઃખોમાં છાશની માફક, ઇંદ્રિય સંબંધી દુઃખોમાં જડભરતની માફક, અને પ્રારબ્ધ ભોગવવામાં કે પ્રભુએ ફળ આપવા કરેલા વિલંબમાં ગોપીજનોની માફક ભાવના કરવી. ૬

દુઃખો ત્રણ પ્રકારનાં છે : (૧) આધિભૌતિક દુઃખ–દેહ સંબંધીનું, જેમ છાશમાંથી માખણ લઈ લીધા પછી છાશ સારરહિત થઈ જાય છે અને પછી એ ઢોળાઈ જાય એમાં કશું દુઃખ થતું નથી તેમ દેહના–સંબંધમાંથી, છાશની માફક, અભિમાન છોડવાથી, અપમાનાદિ થાય એનું દુઃખ ન થાય, એવા અભિપ્રાયથી દેહના સંબંધી સ્ત્રી–પુત્રાદિમાં છાશની જેમ નિઃસાર દૃષ્ટિથી જોવું. દેહાદિથી ભગવત્સંબંધી કાર્યમાં માખણ માફક અભિમાન રાખવું. એ આધિભૌતિક દુઃખ સહન કરવામાં છાશ દૃષ્ટાંતરૂપ છે.

(૨) આધ્યાત્મિક દુઃખઃ—કામ–ક્રોધાદિ વડે ઇંદ્રિયસંબંધીનું, જેમ જડભરતને ભગવદ્ભાવનાવાળી બધી ઇંદ્રિયો થઈ હતી તેથી એમને દુઃખનું ભાન નહોતું અને જડપણું થયું હતું, તે પ્રમાણે સેવામાં પ્રવૃત્ત થયેલી બધી ઇંદ્રિયો ભગવત્સંબંધી છે એવું અનુસંધાન રાખી એને ભગવાનમાં વિનિયોગ કરે તેથી એનો ભગવાનનાં સેવા, ગુણ, કીર્તન, સ્મરણાદિમાં આવેશ રહે, એટલે કામ–ક્રોધાદિનું દુઃખ થાય નહિ. એવા અભિપ્રાયથી આધ્યાત્મિક દુઃખ સહન કરવામાં જડભરત દૃષ્ટાંતરૂપ છે.

(૩) આધિદૈવિક દુઃખઃ—પ્રારબ્ધાધિ ભોગવવા કે પ્રભુએ ફળ આપતા કરેલા વિલંબના સંબંધીનું–જેમ અન્તર્ગૃહમાં રહેલાં ગોપભાર્યાઓને સકામબુદ્ધિરૂપ પ્રારબ્ધ-ભોગ હતો, તેથી એમને પ્રભુની સાથે રાસમાં મળવાના ફળમાં વિલંબ કારણરૂપ હતું; અને એમને ઘરમાંથી નીકળવાનો માર્ગ જડ્યો નહિ ત્યારે શ્રી ભગવાનનું ધ્યાન ધર્યું અને વિરહનું દુઃખ નરક લોક જેટલું થયું, એટલે એમના પાપની નિવૃત્તિ થઈ, અને એમના ધ્યાનમાં પ્રભુ પધાર્યા. પ્રભુનો આશ્લેષ કર્યો તેથી હજારો વરસના સ્વર્ગના સુખ જેવું સુખ થયું એ પછી સગુણ દેહનો ત્યાગ કર્યો અને ભગવત્-પ્રાપ્તિ થઈ તેમ જીવનને પણ પ્રારબ્ધભોગ પૂરા થયા પછી શ્રી ભગવાન ઇચ્છિત ફળ આપશે એમ માની ધૈર્ય રાખી દુઃખ સહન કરવું. જે ગોપીજનોનો નિર્ગુણ દેહ હતો તેમને રાસમાં આવવા સારુ કાંઈ પ્રતિબંધ ન હતો, અને ભગવાન પાસે આવ્યાં અને એમને ઘેર જવા સારુ કેટલાંક વચનો કહ્યાં, તેથી યજ્ઞપત્નીના જેમ ઘેર ગયાં નહિ, પણ મનની ઇચ્છા પૂરી નહિ થવાનો સંભવ થવાથી એમને દુઃખ થયું તે સહન કરીને વળતો જવાબ આપ્યો, અને ઘેર જવાની ઇચ્છા કરી નહિ. માટે વિલંબથી થતાં દુઃખો સહન કરીને પણ પૂર્ણ સ્નેહથી માર્ગની મર્યાદામાં રહેવાથી ભગવાન ઇચ્છિત ફળ આપશે એવું ધૈર્ય રાખીને દુઃખ સહન કરવા એવા અભિપ્રાયથી આધિદૈવિક દુઃખ સહન કરવામાં ગોપીજનો દૃષ્ટાંતરૂપ છે.

प्रतीकारो यदृच्छातः सिद्धश्चेन्नाग्रही भवेत् ।
भार्यादीनां तथान्येषामसतश्चाक्रमं सहेत् ॥७॥

ભગવત્–ઇચ્છાએ જો દુઃખનિવૃત્તિનો ઉપાય સિદ્ધ થાય તો દુઃખ ભોગવવાનો આગ્રહ રાખવો નહિ. સ્ત્રીપુત્રાદિના તથા બીજા નીચ મનુષ્યોના તિરસ્કારો સહન કરવા. ૭

**આધિભૌતિક દુઃખ મટાડવાની વ્યવસ્થા :**—શ્રી ભગવાનની ઇચ્છાથી દુઃખની નિવૃત્તિનો ઉપાય સિદ્ધ થાય, એટલે કે સ્ત્રી વગેરે સેવામાં અનુકૂલ અથવા ઉદાસીન હોઈ આવરણ–રૂપ ન હોય તો એમનો ત્યાગ કરવાની હઠ પર જવું નહિ, એટલું જ નહિ, પણ એઓ અનુકૂલ હોય તો એમની પાસે સેવા કરાવવી, ઉદાસીન હોય તો જાતે કરવી, પણ એમનું સઘળી રીતનું યોગ–ક્ષેમ તો કરવું જ જોઈશે, એઓનો ત્યાગ નહિ કરવો. સ્ત્રી–પુત્રાદિ સેવામાં પ્રતિકૂલ હોય તો જ એમનો ત્યાગ કરવો. નીચ મનુષ્યના તિરસ્કારને સહન કરવો.

**આધ્યાત્મિક દુઃખ નિવૃત્ત કરવાની વ્યવસ્થા :**— પોતાના વિષયરૂપ ભોગ્ય વસ્તુ ભોગવવા તરફ પ્રવૃત્તિ ન થાય. ઇંદ્રિયોના ભોગો સેવામાં અંતરાયરૂપ થતા નથી, તેથી એમનો ત્યાગ કરવા આગ્રહ ન કરવો, કારણ કે એવો ત્યાગ

કરવાનો આગ્રહ નહિ રાખનારાને સઘળા ભોગની સામગ્રી પ્રભુનિમિત્તે હોઈ જરૂરની છે માટે એનો પ્રભુમાં ઉપયોગ થયા પછી મહાપ્રસાદરૂપ તથા પોતાના સૌભાગ્યરૂપ હોવાથી એ ભોગો ભોગવવામાં આવે, ભગવદીય જનોમાં બહારની અને આંતર શુદ્ધિ થયે ભગવાનનો આવેશ થાય છે.

**આધિદૈવિક દુઃખ નિવૃત્તિની વ્યવસ્થાઃ**—પ્રારબ્ધભોગ અથવા પ્રભુએ કસોટી કર્યા પછી ભગવત્કૃપાથી પોતાના પ્રયત્ન વિના બાપ–દાદાથી જે ધન મળે તે શુદ્ધ છે, માટે એનો ત્યાગ કરવા આગ્રહ કરવો નહિ, કારણ પ્રારબ્ધ પણ ભગવાનને અધીન છે. આ ધન પ્રભુએ સેવાના ઉપયોગ માટે આપ્યું છે એમ માની એનો વિનિયોગ પ્રભુસેવામાં કરવો. દેહાદિસંબંધી દુઃખ દેનારાં સ્ત્રી વગેરેનું ભરણપોષણ અપેક્ષિત છે, ધર્મ અપેક્ષિત નથી, તેથી એમનું ભરણપોષણ ન હોય તો એ તિરસ્કાર કરે. એ સહન કરવો, ક્રોધાદિ કરવાં નહિ. મિત્રાદિ ઈર્ષ્યા કરે, ભાઈઓ દ્વેષ કરે, નોકરો તિરસ્કાર કરે, ધર્મના અનુરોધી ભક્તાદિ પ્રમાદી જીવસ્વભાવે કરી તિરસ્કાર કરે, તો એ બધા પ્રારબ્ધાદિભોગ છે, એવી ભાવના રાખી ધૈર્ય ધારણ કરી દુઃખો સહન કરવાં, પણ એમના પર ક્રોધાદિ કરવાં નહિ.

**स्वयमिन्द्रियकार्याणि कायवाङ्मनसा त्यजेत् ।**
**अशूरेणापि कर्तव्यं स्वस्यासामर्थ्यभावनात् ॥८॥**

પોતે મન, વચન અને કર્મથી સર્વ ઇંદ્રિયોના વિષયોને ત્યાગ કરવા. પોતાની અશક્તિનો વિચાર કરીને અને ભગવાનના સામર્થ્યનો વિચાર કરી અશક્ત પુરુષે પણ વિષયભોગનો ત્યાગ અવશ્ય કરવો. ૮

ઇંદ્રિયોને જીતવા દમન કરવામાં જે શૌર્યની આવશ્યકતા છે તે સર્વમાં નથી, તેથી એવા લોકો ભગવાનનો આશ્રય લઈને પોતાની ઇંદ્રિયો પર વિજય પ્રાપ્ત કરી શકે છે. પ્રાકૃત વિષયમાં ઇંદ્રિયોને અલૌકિક પ્રભુસેવાનાં કાર્યમાં પ્રવૃત્ત કરાવવી અને એમાં જે દુઃખ થાય તે સહન કરવું. પ્રારબ્ધભોગ સારુ કે પરીક્ષા સારુ પ્રભુ વિલંબ કરે એમાં પ્રભુની લીલા માની ધૈર્ય જ રાખવું.

**अशक्ये हरिरेवास्ति सर्वमाश्रयतो भवेत् ।**
**एतत् सहनमत्रोक्तमाश्रयोऽतो निरुप्यते ॥९॥**

અશક્ય અવસ્થામાં હરિ ભગવાન જ રક્ષણ કરનારા છે. એમના આશ્રયથી–સર્વ થાય છે. અહીં ધૈર્ય–સહન કરવાનું કહ્યું છે, હવે આશ્રય–શરણ નિરૂપણ કરાય છે. ૯

જે જીવ સેવામાં પ્રવૃત્ત થયો છે અને જેનો વિવેકધૈર્યાદિમાં શક્તિ નથી તેણે શ્રી હરિ શરણ છે એવી ભાવના કરવી, એટલે જે બની શકે તેવાં કાર્ય પણ હરિના

આશ્રયથી સિદ્ધ થાય છે. જો આશ્રય ન હોય તો પોતાથી શકય હોય તોપણ સિદ્ધ થતું નથી. અર્થાત્ નિઃસાધનપણાથી શરણાગતિ થાય તો પ્રભુકૃપા વિવેક ધૈર્ય બધાં એક જ સમયમાં સિદ્ધ થાય છે.

ऐहिके पारलोके च सर्वथा शरणं हरिः ॥९½॥

આ લોકસંબંધી અને પરલોકસંબંધી કાર્યોમાં સર્વ પ્રકારે શ્રી હરિ જ મારું શરણ થાઓ. ૯½

પારલૌકિક સુખો મેળવવામાં અને સાંસારિક સુખો પ્રાપ્ત ન થતાં એ મેળવવામાં, એમ બધા પ્રકાર શ્રી હરિ જ શરણરૂપ છે.

दुःखहानौ तथा पापे भये कामाद्यपूरणे ॥१०॥
भक्तद्रोहे भक्त्यभावे भक्तैश्चातिक्रमे कृते ।
अशक्ये वा सुशक्ये वा सर्वथा शरणं हरिः ॥११॥

દુઃખની નિવૃત્તિ થવામાં તથા પાપ અને ભયમાં, ઇચ્છાઓ પૂરી નહિ થવામાં, ભક્તદ્રોહમાં, ભક્તિના અભાવમાં, ભક્તો દ્વારા અનાદર થાય ત્યારે, ન બની શકે અથવા બની શકે તેવાં કાર્યોમાં શ્રી હરિ સર્વ પ્રકારે મારું શરણ થાઓ. ૧૦–૧૧

ભક્તિમાર્ગના જીવની સેવામાં પ્રવૃત્તિ હોય અને એમાં કોઈ ભગવદપરાધ થઈ જાય ત્યારે ચિત્તમાં ઉદ્વેગ ન થાય એ સારુ શરણની ભાવના કરવી. આ માર્ગમાં પ્રવેશ થતાં પહેલાં પ્રમાદથી કોઈ પાપ થયું હોય તો પોતાના દોષ વિચારી એની નિવૃત્તિ માટે શરણભાવના કરવી. પ્રાયશ્ચિત્તાદિ જેવું કશું કરવા જરૂર નથી. ભગવત્સ્વરૂપમાં સ્નેહ ઉત્પન્ન ન થાય એ સારુ ભક્ત અપમાન કરે તો શરણ ધર્મ જાય છે. માટે સર્વાત્મભાવથી હરિના **શરણની** ભાવના કરવી.

अहंकारकृते चैव पोष्यपोषणरक्षणे ।
पोष्यातिक्रमणे चैव तथान्तेवास्यतिक्रमे ॥१२॥
अलौकिकमनःसिद्धौ सर्वार्थे शरणं हरिः ।
एवं चित्ते सदा भाव्यं वाचा च परिकीर्तयेत् ॥१३॥

જીવસ્વભાવથી કોઈની સાથે અહંકાર કર્યો હોય એમાં, પોષણ કરવા યોગ્યનું પોષણ રક્ષણ કરવા સારુ, સેવકો દ્વારા અનાદર થવામાં, તેમજ પોતાના શિષ્યે કરેલા તિરસ્કાર માટે અભિમાન થાય તેથી આસુરાવેશ આવી જાય છે પછી વિવેકબુદ્ધિ વડે પશ્ચાત્તાપ થાય છે ત્યારે માનસી સેવાની સિદ્ધિમાં, તેમજ સર્વ અર્થોમાં, શ્રી હરિ જ મારું શરણ છે એવી ભાવના કરવી અને વાણી દ્વારા હરિકીર્તન કરવું. ૧૨–૧૩

આવા પ્રસંગોમાં કાયા, વાચા અને મનસા—એ ત્રણે પ્રકારથી પ્રભુની શરણાગતિ લેવી અને એમ કરવાથી આગળ જે અશક્ય કહેવામાં આવ્યું છે તે પણ શક્યરૂપે પરિણામ પામે છે.

**अन्यस्य भजनं तत्र स्वतो गमनमेव च ।**
**प्रार्थनाकार्यमात्रेऽपि ततोऽन्यत्र विवर्जयेत् ॥१४॥**

શ્રી ભગવાન વિના બીજા દેવોનું ભજન, અને પોતે ત્યાં જવું એ, અને કોઈ કામ સારુ એમને પ્રાર્થના કરવી—આ ત્રણ વાતનો સર્વથા ત્યાગ કરવો. ૧૪

જો એમ કરવામાં ન આવે તો શરણભાવના જતી રહે છે, શ્રી ભગવાનને અનન્ય ભક્તો જ પ્રિય છે, અને જો અન્યાશ્રય થાય તો એ એમને પોતાનો આશ્રય આપતા નથી.

**अविश्वासो न कर्तव्यः सर्वथा बाधकस्तु सः ।**
**ब्रह्मास्त्रचातकौ भाव्यौ प्राप्तं सेवेत निर्ममः ॥१५॥**

શરણાગતિમાં અવિશ્વાસ કરવો નહિ. એ તો સર્વ પ્રકારે બાધક છે. અવિશ્વાસમાં બ્રહ્માસ્ત્ર અને ચાતક પક્ષીનું દૃષ્ટાન્ત વિચારવા યોગ્ય છે. અને જે પ્રાપ્ત થયેલું છે તેનું મમતા રહિત થઈને સેવન કરવું. ૧૫

જેમ રાવણના પુત્ર ઇંદ્રજિતે સૂતરના દોરામાં બ્રહ્માસ્ત્રની ભાવના કરી એ વડે હનુમાનજીને બાંધી રાવણ પાસે લાવ્યા, પણ રાવણને એમાં અવિશ્વાસ આવ્યો અને એમને લોખંડની મોટી સાંકળોથી બાંધ્યા, પણ એ તોડી નાસી છૂટી ગયા. ચાતક પક્ષી સ્વાતિ નક્ષત્રનું જ જળ પીવું એવો દૃઢ નિશ્ચય કરે છે તો એને વિશ્વાસના બળથી સ્વાતિના વરસાદનું જળ મળે છે, અને એ પીવાને પણ ભાગ્યશાળી થાય છે. માટે અવિશ્વાસ છોડી દઈ, લૌકિક વિષયોમાં મમતાનો ત્યાગ કરી, દૈવઇચ્છાથી જે કાંઈ સુખદુઃખ અથવા એનાં સાધનો મળે તેનો અનુભવ કરવો, પણ એમાં અભિનિવેશ રાખવો નહિ.

**यथाकथञ्चित् कार्याणि कुर्यादुच्चावचान्यपि ।**
**किं वा प्रोक्तेन बहुना शरणं भावयेद्धरिम् ॥१६॥**

લૌકિક અને વૈદિક કાર્યો પણ પ્રભુની આજ્ઞા સમજીને જે કાંઈ બને તેવી રીતે કરવાં. અથવા ઘણું કહેવાથી શું ? શ્રી હરિના શરણની ભાવના કરવી. ૧૬

વૈદિક કાર્યો સેવાના અનવસરમાં નિષ્કામપણાથી કરવાં. લૌકિક કાર્યો પણ મમતા રાખ્યા વિના કરવાં. સેવાનાં કાર્યો તથા લૌકિક—એ બંને જાતનાં કર્મો બની શકે ત્યાં સુધી કરવાં, પણ કરજ કરીને કે લોકલાજ સારુ એ કર્મો કરવાં નહિ.

एवमाश्रयणं प्रोक्तं सर्वेषां सर्वदा हितम् ।
कलौ भक्त्यादिमार्गा हि दुःसाध्या इति मे मतिः ॥१७॥

આ પ્રકારે આશ્રયના સ્વરૂપનું નિરૂપણ કર્યું. એ કલિયુગમાં બધા વર્ણ આશ્રમ-વાળાને નિરંતર હિતકારી છે. ઉપાસનાદિ મર્યાદામાર્ગ કઠિન સાધન વડે સિદ્ધ થાય તેવા છે, એમ શ્રીમદાચાર્યચરણનું માનવું છે. ૧૭

બીજા યુગોમાં ધર્મ પ્રધાન હતો અને તેથી સાધન વડે ઉપાસના કર્મ વગેરેનાં ફળ મળતાં હતાં, પણ કલિયુગ પાપપ્રધાન છે તેથી સાધનના અભાવમાં ભક્તિ વગેરે થઈ શકે નહિ, માટે શરણાગતિ કરવાથી શ્રી ભગવાન અનુગ્રહ કરશે એવી ભાવના કરવી, બીજું કશું કરવું નહિ.

આ પ્રમાણે શ્રીમદ્‌વલ્લભાચાર્યજીએ પ્રકટ કરેલો વિવેકધૈર્યાશ્રયનિરૂપણ નામનો ગ્રંથ સંપૂર્ણ થયો.

INDIAN INSTITUTE OF ADVANCED STUDY

Acc. No. ______________

Author : ______________________________

Title : ______________________________

| Borrower | Issued | Returned |
|---|---|---|